स्वगरपसुविहितावनवक यावा भोनिधि श्रीमद्विजयान दसूरीश्वरपट्टप्रभाकर श्रीमद्विजयकमलसूरिमार्गभीमणावपयेभ्यो नमो नम ।

श्रीजिनदासगणिमहत्तरवर्य्यविनिर्मितचूर्णिश्रीमद्धरिभद्रसूरिसन्दब्धवृत्तिसनाथीकृतम्

सन्थवर्य्यश्रीमद्देववाचकवर्य्यविरचितम्

बा ७८५ क्रमाङ्क १८९६ पत्र
१ ३11(10 3)

श्रीमन्नन्दीसूत्रम् ।

श्रीसंशोधयितृपाद —

प्रात स्मरणीयश्रीमद्विजयकमलसूरिविराधपट्टालङ्कारप्रौढगीतार्थपूज्यप्रवेकाचार्यश्रीमद्विजयदानसूरीश्वरा ॥

मरुदेशीयश्रीरोहीराज्यगतपाडीवग्रामवास्तव्यश्रीमद्रूपचन्द्रजी नवलमलजीतिभ्रातृभ्या स्व स्वस्वकीयपितृश्रेष्ठीवर्यठाकरजीश्रेयोऽर्थम् ।

इन्दौरनगरे श्रीजैनबन्धुमुद्रणालये श्रेष्ठिजुहारमलमिश्रीलालपालरेचा द्वारा मुद्रापयित्वा

साधुसाध्वीपठनार्थं प्राकाश्यपथ समानीतम्

वीर स २४५७] पण्यम्--पठनपाठनम् विक्रम स १९८८ (प्रतय ५००) [A D 1931

नन्द्युपोद्घातः

प्रेमोत्तुङ्गनगप्रभेदनपविर्द्वेषाऽधिसवत्सक, कोपध्वान्तसमापनैकसविता मानेभकण्ठीरव ।
मायावारिधरप्रचण्डपवनो लोभाटवीपावक, विश्वे रक्षतु न प्रतापनृपतिर्जैनेश्वरो जन्मिन ॥ १ ॥

यस्यानन्यकलाभृतोऽतिमविभो पट्टावलीपुष्करे, भूय कोविदरत्ननीरधिवरे सौहार्दपीयूषभा ।
आम्नायागुरुभक्तिनारुपयस कुर्वन्ति वृद्धिं सदा, कुन्दद्युतियशा स ना विजयते श्रीदानसूरीशित ।
विनेयविमलश्रीश्च कैरविणीकलाभृते । ऐंकारसमबीजायै, सरस्वत्यै सदा नम ॥ ३ ॥

अथाधुनोपक्रम्यते पारमेश्वरप्रवचनपीयूषपानपीनचेतसा विनोदाय कोविदकुलचमत्कारकृद्वैदुष्यवैभवशालिश्रीमज्जिनदासगणिमहत्तरविनिर्मितचूर्णिचतुश्चत्वारिंशदधिकचतुर्दशशतप्रकरणप्रणयनजनितजगज्जन्तूपकारयाकिनीमहत्तरासूनुविद्वद्वृन्दवृन्दारकोत्तमागविधुननधीमुषीशालिभगवच्छ्रीमद्धरिभद्रसूरिसदब्धटीकासनाथीकृतमिद श्रीनन्दीसूत्र देवार्धशासनाभोनभोमणिभगवद्देववाचकवर्यविरचितम् । एतेषा त्रयाणा सूत्रकृच्चूर्णिकारटीकाविनिर्मातवर्याणा मान्यमतल्लिकाना प्रस्तावे यत्किंचिद्वक्तु प्रयत्यते ।

तत्रादयस्तावत् देववाचकपूज्यप्रवरा एव नन्दीसूत्रसूत्रणसूत्रधारा आसन् श्रीनन्दीसूत्रस्य सप्तदशमसूत्रटीकायां 'देववाचकविरचितोऽय ग्रन्थ ' इति श्रीहरिभद्रसूरिवचनात् । ते च देवर्द्धिगणिक्षमाश्रमणापरनामानोऽपि सभाव्यन्ते, यतस्त

श्रीनन्दीसूत्रं मलयगिरीयवृत्तिकम्। ॥ २ ॥

योगन्धाम्नुगिनिगापलिर्थीथित्रवचेनसूरीश्वराः [illegible] गितेनप्रशापांगामे प्राहुः 'अल्पबजाण्प्रेधरः सिद्धान्तपाठेषु सौकर्यं करोतीति वृद्धवादः सत्यपि वर्तते, तदक्षराणि तु ज्ञानि नयां [illegible] चिपारान्नसंघाते न सन्ति तथा च भगवतीसूत्रे देवर्द्धिगणिक्षमाश्रमणकृतनन्द्यध्ययनानुसारात् [illegible] सिद्धान्तपाठेषु सम्यक्भगवत्यादिष्वपि सौकर्यं कृतं, सूत्रसंदर्भस्तु देवर्द्धिगणिक्षमाश्रमणेन कृत इति केचनाहुः, विशेषस्तु तत्त्वविद्भ्य इति ध्येयम्' इति । अस्मिन् ग्रन्थे 'देवर्द्धिगणिक्षमाश्रमणकृतनन्द्यध्ययनस्य' इत्युक्तेन [illegible] मतमस्ति नन्द्यध्ययनकर्तृणां देवर्द्धिगणिक्षमाश्रमणास्मात् [illegible] देवर्द्धिगणिक्षमाश्रमणनाम्नामानोऽपि [illegible] इति मुग्धविभावना । ननु [illegible] आर्यादिदेवगणौ [illegible] न [illegible] सोऽपि [illegible] कार्थीभदैन्व्रगरिषाः [illegible] प्राहुः 'तदा भगवान् देवर्द्धिक्षमाश्रमणाः नाणं पंचविहं पण्णत्तमित्यादि' 'तदा देवर्द्धिक्षमाश्रमणः [illegible] इत्यादि' '[illegible] ज्ञानसंभारप्रमग देवर्द्धिगणिनामकाः [illegible] पण्णत्तमित्यादि' 'तदा भगवान् देवर्द्धिक्षमाश्रमणाः [illegible] अणागुणामिगमित्यादि' इति । तस्मात् देवर्द्धिगणिक्षमाश्रमणा [illegible] इति तु शंकाऽवकाशः [illegible] । [illegible] तु विशेषेण विशेषम् । [illegible] इति [illegible] । [illegible]

॥ २ ॥

नारोहणकर्तृश्रीदेवर्द्धिगणिक्षमाश्रमणास्तु भगवत्स्थूलीभद्रपादद्वितीयपट्टपट्टालङ्कारार्यसुहस्तिसूरिवर्यशाखायां वर्द्धयामासु इति प्रकट प्रतीयत श्रीकल्पसूत्रपट्टावलीतश्चैव । तस्मात् पूज्यसत्तमास्त श्रीदेववाचकपादा श्रीमद्देवर्द्धिगणिक्षमाश्रमणापराऽऽख्या अपि प्रवचनस्य पुस्तकारुढकारकश्रीदेवर्द्धिगणिक्षमाश्रमणैर्विभिन्ना एवेति पर्यवसितोऽर्थ. ।

द्वितीयस्तावत् नन्दीसूत्रचूर्णिकृद्वरा कां जगन्निलयजन्तुजातचित्तमन्दिरपुनाना नाममूर्ति विभ्रयांचकु इति जिज्ञासायां प्रत्यूषाभिस्मरणीयमङ्गलाभिख्य जिनदासगणिमहत्तरमिति धारयामासुस्ते इति नायते,''णिरेणगमत्तणहसदाजिकया, पसुपतिसखगनठिताऽऽकु (वार) इला कम्मठिता । धीमतचिंतियक्खरा, फुड कहयतभिधाण कुणो ॥२॥" इति चूर्णिप्रान्तसाकेतिकवचनात् । पुन कतमा भूमि स्वजनुषा पावयामासु, कस्मिन् गच्छाम्बरे ते सहस्रभानव उदगु, कस्य च विद्वद्वृन्दवृन्दारविदिताघ्रिचरणस्य गुरुवरस्याभ्यर्णेऽनेकभवसञ्चितकल्मषपरपरानलोदकाभा पारमेश्वरीं प्रव्रज्यामङ्गीचकु इत्यादिजिज्ञासानिघत्सावुभुक्षितजनाना क्षुधानिर्वापनार्थं वय तादृगाहारसामग्रीविकला नालभूष्णवो यतस्तद्विषयकप्रतिपादन न कुत्रापि दृश्यते । श्रीनिशीथचूर्णिप्रान्तेऽपि जिनदासगणिमहत्तरेति कर्त्रभिधानमात्रमेवोपलभ्यते । अत्र जैनदर्शनप्रणाल्यनभिज्ञा कल्पनैकप्रमाणप्रवणा ऐतिहासिकान्वेषणानिबद्धचक्षुष केचित्का चरित्रे विश्वसनीयताविशिष्टमहत्ताप्रामाण्यादयो तदैव स्वीक्रियेरन् यदा चरितोपनायकस्य समयोल्लेखो भवेत्, 'जैनप्राक्तनग्रन्थकर्वां तूद्देश सवत्प्रयुक्तान्वेषणात्मकैतिहासार्थं नाभूत्, किन्तु स्वीयधर्मसमर्थकाचार्यादिविद्वद्भि निजधर्मप्रभावनार्थं कथ जगज्जनाश्चमत्कारतामुपनीताः कथ वा परवादिपाण्डित्यपराभवो विहित इत्यादिपूर्वपरपरागता जनमनोरजककथा पुस्तकारूढा कृत्वा शाश्वतीकर्त्तुमेव वभूव, एवरीत्या सर्वसाधारणधर्म-

प्रभावनादृते नान्यत्किंचित् प्रदर्शितुमभवत्' इत्याहुः । एतद् वालजल्पितम् स्वकीयानभिज्ञतासूचकमेवार्हतशास्त्रपरिचये । यतः प्ररिाद्धपचमहाव्रतपरिपुष्टशरीरामार्हतीप्रव्रज्यां प्रतिपन्ना ते विश्वविश्वोपकारका जैनाचार्यधुरन्धरा न प्राणान्तेऽपि मृषा वदेयु इति तैः कल्पनाभरक्रान्तहृदयैर्न विस्मर्त्तव्यम् । यदि चरित्रोपनायकसमयोपलम्भाभावे तन्न प्रतिपादितं भवेत् तदा नैष चरित्रसंदृब्धृपादानां दोषः न वा चरित्रनायकस्य किन्तु तादृक्शंकाक्रांतचेतसामुन्मत्तचित्तस्यैव, यद्यपि चरित्ररचयितृवरै-रुपलम्भाभावे न लिखितमिति समीचीनं किन्तु चरित्रनियन्तृवरैः स्वीयरचनायामेव यो स्वसमयपरिचयाद्युल्लेखो न विहितः इत्यपि न तेषां पूज्यप्रवराणां पूर्वोक्तोद्देशज्ञापकः किन्तु तेषामनन्यनिस्पृहिशिरःशेखरतापरिचायक एव । ते पूज्यप्राग्रहराः सर्वतंत्रस्वतन्त्राः सर्वज्ञाज्ञापरवशा एव नाधुनिकपिंडपेशलप्रज्ञानां कल्पनापरवन्तो बभुवुः । प्राक्तनाचार्याग्रिमानां यथातथ्यप्रयासो जगज्जन्तूपचिकीर्षानुकुलः एवाभूत् न तु केवलं यद्वा तद्वा लेखनेनस्वीयधर्मप्रभावनाप्रवणः पूर्वोक्तजनमनोरंजकादिकार्यार्थ-मिति स्फुटमवगन्तुं शक्यते श्रद्धाञ्जनोन्मिलितनेत्रकैः यद्येतत्तथ्यवार्तातपोऽपि यदाधुनिकपवनान्धतमसास्कन्दितचक्षुषां न दृग्गोचरीभवति तदा स न कस्यचिदपि परस्य दोषः किंतु 'नो घूकोऽप्यवलोकते यादि दिवा सूर्यस्य किं दूषण' मितिन्यायेन स्वकीयाक्षिनिष्ठ एवेत्यलं विस्तरेण । प्रकृतमनुस्रियते । चूणिकृदस्तित्वप्रस्तावे कस्यांश्चिन्नन्दीसूत्रचूर्णिप्रतौ शकराज्ञः पंचमश-ताद्धी दृश्यते तथापि प्राक्तनानेकप्रातिमध्ये कुत्रचिदिमान्यक्षराण्येव नोपलभ्यन्ते कुत्रचित्त्वन्यथाऽपि दृश्यन्तेऽतस्तदक्षराणि प्रमाणास्पदानि न प्रतिभान्ति । ततो ये केचन बृहट्टिपणिकादिषु स्वाभिलापपूर्त्यर्थं शकराज्ञः पंचशताधिकाष्टनवतिसंवत्सर प्रतिपादयन्ति तदपि प्रमाणानास्पदं द्रष्टव्यम् । यतः श्रीमद्विजयसेनसूरीश्वराः सेनप्रश्नीयाद्योल्लासेऽपि तथैवोल्लेखयामासुः—

" निशीथचूर्ण्यावश्यकचूर्णिपर्युषणाकल्पचूर्णय किं कालीनै कैः कीदृशै कियच्छ्रुतैश्चाचार्य प्रणीतास्सन्तीति प्रश्नोऽत्रोत्तर एत सां चूर्णिनां मध्ये निशीथचूर्णिकर्तुरभिधान जिनदासगणिमहत्तरेति तत्रात प्रोक्तमस्ति । परमपरासा चूर्णिनां कर्तुरभिधान कालनैयत्य च नोपलभ्यत इति ॥९९॥ " तथा चास्मादुल्लेखात् श्रीजिनदासगणिमहत्तरसमयो नदीसूत्रचूर्णिप्रतौ श्रीविजयसेनसूरीशितृणा नयनातिथित्व न बभूव । यदि बभूव चत् तथापि प्रमाणभूतत्व तस्यासभाव्य मानत्वात् नात्र प्रतिपादितमिति प्रतिभाति । किं च प्राय शतद्वयसवत्सरात्प्राग्लिखितायामप्येकस्यां श्रीनिशीथसूत्रचूर्णिप्रतौ दृग्गोचरीक्रियमाणद्वादशशताब्दी यथाऽन्यभावमञ्चति तथैव पूर्वोक्तसवत्सरविषयेऽपि किं न स्यात् ? स्यादेव ।

तृतीयस्तावत् टीकाकृद् भगवान् श्रीमद्धरिभद्रसूरिसकन्दनाना निज्ञासुजनसुधाश्चानिपरिचयाकाक्षावसरे— "कृति रिय सिताम्बराचार्य जिनभद्रपादसेवकस्याचार्यश्रीहरिभद्रस्येति " वृत्तिप्रान्तवक्तव्येन स्पष्टमवबुध्यते यद्वृत्तिरिय श्वेताम्बराचार्य-जिनभद्रपादसेवकाचार्यश्रीहरिभद्रसूरीशरचितेति । दृश्यते चैवमावश्यकवृत्तिप्रान्तऽपि "समाप्ता चेय शिष्यहितानामावश्यक टीका । कृति सिताम्बराचार्यजिनभद्रनिगदानुसारिणो विद्याधरकुलतिलकाचार्यजिनदत्तशिष्यस्य धर्मतो याकिनीमहत्तरासु-नोरल्पमतेराचार्यहरिभद्रस्येति"। अत्रापि श्रीजिनभद्रसूरिपुरदरसाम्राज्यानुवर्तिश्रीजिनदत्तसूरिसान्तिषद्याकिनीमहत्तराधर्मपुत्रेण श्रीहरिभद्रसूरिणाऽऽवश्यकलघुटीकेय व्यरचीति ज्ञायते । अस्यैवावश्यकसूत्रोपरि बृहद्वृत्तिरपि तैरेव सूरिप्रवरैर्निरमायि, तत्र विशेषोल्लेख कृताऽनुमीयते तथापि तद्दृग्विषयीकर्तु वय भाग्यशालिनो नाभवाम । नान्यत्र कुत्रापि तैः सूरिवरै स्वीयपरिचय विषयेऽधिकमुल्लेखितमाधुनिकानेहस्युपलब्धु शक्यते । श्रीनदीसूत्रटीकाकृतो भगवन्त श्रीमद्धरिभद्रसूरिसूत्रामाण. शरसि

द्विपृषत्कप्रमिते विक्रमसंवत्सरे स्वारमणीरमणाः संजाता इत्यनेकप्रमाणैस्तावज्ज्ञातुं शक्यते । प्रतीयते चैवं सूरिसुरर्षभाणां विद्यमानता षष्ठमवैक्रमशताब्द्यामेवाविगानतया ।

अत्र कल्पनाश्वारूढा आप्तोक्तिश्रद्धामुखरज्जुपराङ्मुखाः स्वातन्त्र्यवायुवर्मभृतः पतितपुरोगाः स्वकीयवचनाग्रे त्रिकालाबाध्यागमवाचमप्यसत्यतया भ्रान्त्यादिदोषजन्यतयाऽन्यथा प्रख्यापयितुमपि बद्धकक्षाः प्रलपन्ति केचित्— “ ते सूरिवरा अष्टमशताब्द्यां प्रादुष्पन्ति स्म ” इति । प्रमाणयन्ति च ते प्रज्ञाप्राग्भारप्रकम्पमाना वक्ष्यमाणविचारचातुरीचर्यया यथा—‘आद्यं तावत् सूरिवरैस्तैः स्वसंदृब्धनंदीसूत्रटीकायां चूर्णिकृज्जिनदासगणिमहत्तरप्राक्तनप्राकृतव्याख्याया अनेकावतरणानि यथायथं समुद्धृतानि दृग्गोचरीक्रियन्ते, चूर्णिश्च शकसंवति सिद्धिनिधिविशिखमिते (त्रयस्त्रिंशदधिकसप्तशतविक्रमसंवत्सरे) समाप्ता बभूवेति प्रकटं प्रमीयतेऽन्तिमभागतः । तस्माच्चूर्णिकृदनु तेषामस्तित्वमष्टमशतसंवत्सर्यां संभाव्यते’ इति एतदप्यापातत एव रमणीयतामञ्चति । आद्यं तावच्चूर्णिकृत्काल एव निश्चेतुमशक्योऽस्ति,यत्पूर्वमुक्तं चूर्णिकृत्परिचयप्रस्तावे । तस्मात् “ शकराज्ञः पंचसु वर्षशतेषु व्यतिक्रांतेष्वष्टनवतिषु नंद्यध्ययनचूर्णिः समाप्ता ” इत्यपि केनचित् प्रक्षिप्तमिव विभाव्यतेऽन्यत्र प्रत्यन्तरे संवत्सरान्तरस्यापि दृश्यमानत्वात् । ततो हारिभद्र्यां टीकायां समुद्धृतानि चूर्णिकारावतरणान्यपि न तयोः पौर्वापर्यनियामकानि । यतः श्रीहरिभद्रसूरिवरैश्चूर्णिकृतां चूर्णिकारैष्टीकाकृतां वा वाक्यानि समुद्धृतानीत्यत्र विनिगमकाभावप्रसञ्जनं दुर्वारम् । यदुक्तं ‘ नंदीसूत्रबृहट्टीकायामाचाराङ्गसूत्रविषयकव्याख्यावसरे श्रीमन्मलयगिरिपादाः “तथाचाह चूर्णिकृत् ” इत्युक्त्वा नंदीचूर्णिनिष्ठं कंचित् पाठमुद्धरयांचक्रुस्तमेव पाठं श्रीहरिभद्रसूरयः स्वटीका-

यामपि' इति तदपि न चूर्णिकारटीकानिर्मातृवर्ग्ययो' पूर्वापरता साधयितुमलम्, यत' पश्चात्तनानामपि चूर्णिकृता पाठस्यापि श्रीमन्मलयगिरिदवैरुल्लेखकरण सभावयितु शक्यते। यदि च स्वपार्श्वे तदवसर चूर्णिस्स्यात्तदा प्राक्तनीमपि टीकामुपेक्ष्यावोक्त नचूर्णित एवावतरणसमुद्धरण न बाधावहम्। एव यदा चूर्णिकारटीकाकृत्पूर्वापरभावसभावना वैयर्थ्यशालितामियर्ति तदा तत्र कल्पनाऽपि न सिद्ध्यतीति स्फुटमवावगम्यते। यत एवमपि सम्भाव्यते यदुत श्रीनदीसूत्रोपरि चूर्ण्यन्तराण्यपि प्राक्काले सवयुस्तत्र त्यावतग्णान्यूमयत्रापि टीकाचूर्ण्यो पुन समीचीनतां घटन्त यासां वर्तमानकाले समुच्छेद एवाकामेनापि त्वया कक्षीकरणीय' यहवोऽप्यनर्घ्यग्रथरत्ना समुच्छेदसपत्तिसमापना इदानींतनसमये दरीदृश्यन्ते। यथाऽऽवश्यकोपरि पाग्बृहट्टीका अभवन्निति श्रीहरिभद्रसूरिपादा आवश्यकटीकामगलानुष्ठाने प्राहु —"यद्यपि मया तथान्य कृतास्य विवृत्तिस्तथापि सक्षेपात्। तद्रुचिसत्त्वानुग्रहहेतो क्रियते प्रयासोऽयमिति"॥ अतोऽवगन्तु शक्यमस्ति यदावश्यकस्यैका बृहट्टीका प्रस्तुतसूरिदृब्धा चतुरशीतिसहस्रश्लोकप्रमाणप्रघोषा अनेका च अपराष्टीका अज्ञातपरिमाणादयो वरीवर्तन्तेस्म पाक्तनानेहसि। एव प्राक्सभावितनदीसूत्रचूर्ण्यन्तराण्यपि न कल्पनात्मकानि।

द्वितीया विचारचातुरी पुनस्तेषां कल्पनाकृपिकाविलानां विश्वविख्यातोपमितिभवप्रपञ्चाख्यकथामनुधावति। 'तत्रोपमितिभवप्रपञ्चाकारा स्वकीयकथाप्रातप्रशस्तावाचार्यश्रीमद्धरिभद्रसूरिवरस्य श्लोक कर्तुकामा त्रिभि श्लोकै स्वधर्मगुरुतया प्रख्यापयामासुस्तद्यथा—

'आचार्यो हरिभद्रो मे, धर्मबोधकरो गुरु। प्रस्तावे भावतो हन्त, स एवाद्ये निवेदित ॥ १ ॥'

विषं विनिर्धूय कुवासनामयं, व्यचीचरद्यः कृपया मदाशये । अचिन्त्यवीर्येण सुवासनासुधां, नमोऽस्तु तस्मै हरिभद्रसूरये ॥ २ ॥
अनागतं परिज्ञाय, चैत्यवन्दनसंश्रया । मदर्थेव कृता येन, वृत्तिर्ललितविस्तरा ॥ ३ ॥"

उपमितिकथा च दशमशताब्द्यां बभूवेति प्रतीयते स्पष्टं तत्रत्यान्तिमश्लोकात्—
" संवत्सरे शतनवके, द्विषष्टिसहितेऽतिलंघिते चास्याः । ज्येष्ठे सितपंचम्यां, पुनर्वसौ गुरुदिने समाप्तिरभूत् । " इति ।

सौगतसिद्धान्तपठनार्थं गता श्रीसिद्धसाधुगणिवरा उपमितिकथाकृत एकविंशतिकृत्वो गतागतमकुर्वन् प्रान्ते ललितविस्तराख्यवृत्त्या स्थिरीभूताः कियत्कालादनु कथेयं रचयांचक्रुः इत्यवगन्तुं शक्यते यद् श्रीहरिभद्रसूरिवराः श्रीसिद्धर्षिगणिवर्य्यस्य समसमये भारतवर्षमिमं शोभास्पदं चक्रुः । यद्यपि सिद्धर्षिगणिप्रवरैः संवत्सरांक एव प्रशस्तौ लिखितो न तु संवत्सरप्रवर्तकाभिधानं तथापि तादृग्ज्योतिषशास्त्रगणनादनु स ह्यागतो वैक्रम एवानुमातुं शक्यते तस्मात् सूरिवरस्य विद्यमानतापादकषष्ठमशताब्दी तु असंभवग्रस्तैव' । एतदप्यपास्तं वक्ष्यमाणप्रमाणैर्द्रष्टव्यम् ।

श्रीसिद्धर्षिगणिवराः सौगतसिद्धान्तमर्मग्रहणार्थं गता भृशं गतागतम् कृत्वा प्रान्ते श्रीहरिभद्रसूरिप्रवरसंदृब्धललितविस्तराख्यया शक्रस्तववृत्त्या प्रौढयुक्तिजालजटिलयाऽर्हतदर्शने निश्चलचित्ताः सन्त एव तं सूरिपुंगवं गुर्वधिकबहुमानतया ददृशु इत्येवार्थं सम्यग्भावं बिभर्ति न तु तदवसर एव विनिर्मितललितविस्तराख्यया वृत्त्या प्रतिबुद्धाः । अत एवाग्रे 'मदर्थेव कृता येन वृत्ति'रित्यत्रैवकारार्थोऽपि संगच्छते । अर्थात् सूरिवरैर्मल्लं तद्वृत्तिर्न कृता तथापि सा यदा मम भवपरंपरानिबन्धनीभूतार्हद्धर्मत्यागस्य विच्छेदायाभूत् तदा मदर्था न कृतापि मया मदर्थैव कृता मन्तव्या । अत एव 'अनागतं परिज्ञाय' इत्य-

स्यार्थोऽपि सगच्छते, अर्थात् भविष्यन्तमपि मा ताद्दग्ज्ञानबलेनैदश विह्वलचित्त परिज्ञाय ललितविस्तरा विहिता। अन्यथा 'अनागत''मदर्थैव' इत्यनयो शक्यार्थनैयर्थ्यप्रसगो दुरपसारणीयस्स्यात्। केचनात्र स्वेष्टसिद्ध्यभिनिविष्टमतयो धनविजयादय 'अनागतम्' इत्यस्यानेकार्थपरतया व्यावर्णयन्ति यथा 'अनागतम्' इत्यस्य शाक्यमतमर्मोदानाथ गत मा न आगत दृष्ट्वा ललितविस्तरा निर्मिता इति। इदमपि स्वकीय वाग्विलासप्रतिपादकमेव। प्रसिद्धार्थहाने तदतिरिक्तार्थकल्पनाया च प्रमाणाभावात् 'मदर्थवे'ति प्राक्पदार्थेन सह विरोधापत्तेश्च। 'मदर्थैवे'त्यस्याप्यर्थान्तरकल्प नायामिथ कारशक्यार्थस्य वैफल्यापत्तेर्दुर्वारत्वाच्च। 'अनागतम्' इत्यस्या येऽर्था पुन केवल स्वीयसवित्तिविपर्ययापादका एव, तादृक्क्लिष्टकल्पनाया प्रमाणाद्रष्टचरत्वात् शक्यार्थविद्यमानेऽपि लक्ष्यार्थकक्षीकरणे सर्वत्रविरोधापतेर्दुर्निवारत्वा चेत्यल पल्लवितेन। एवमुपमितिप्रशस्तिवचनान्यपि श्रीहरिभद्रसूरिश्रीसिद्धर्षिगणिवरयो समसमय साधयितु नालभविष्णूनि। अपि च सम्प्रति प्रतिपादितोपमितिप्रशस्तिवचनात् उपमितिरचनाया विक्रमदशमशताब्दीकालीनत्वात् श्रीसिद्धर्षिप्रस्तुतसूरिप्रवेकयो समसमयमिद्धिवद्धबुद्धयोऽग्रसाधयिष्यमाणाष्टमशताब्दीपुष्करपतगतां प्रस्तुतसूरिवरस्य कया युक्त्या साधयिष्यन्तीत्यपि तेषां तादृक्प्रतिभादर्श एव प्रतिफलितु शक्यम्। नान्यत्र।

तृतीया तावत्तपा पूज्यपादश्रीहरिभद्रसूरिवाक्त्रिणामस्तित्वस्याष्टमशताब्दीसाधकानां विचारवायुविहित दराणा कुवलयमालाभिधानप्राकृतकथामनुधावति। तथाहि 'श्रीकुवलयमालाख्यकथाकारोद्यतनसूरिप्रभवो दाक्षिण्यचिह्नापरनामानो स्वकीय कथाप्रान्तप्रशस्तौ निजगुरुपरम्परां प्राग् वर्णयित्वा विशिष्टोपकारिसस्मरणार्थमेव वर्णयामासु'—

''सीसेण तस्स एसा, हिरिदेवीदिन्नदसणमणेण। रइया कुवलयमाला, विलसिरदक्खिन्नइधेण ॥ १ ॥

दिन्नजहिच्छियफलओ, बहुकित्ती कुसुमरेहिराभोओ । आयरियवीरभद्दो, अहावरो कप्परुक्खोव्व ॥ २ ॥

सो सिद्धन्तम्मि गुरू, पमाणनाएण जस्स हरिभद्दो । बहुगन्थसत्थवित्थर-पयडसमत्तसुअसच्चत्थो ॥ ३ ॥" इति

अनुपदवर्त्तमानकारिकायां कुवलयमालानिर्मातारः प्रस्तुतसूरिशक्रान् प्रमाणतर्काध्यापकतया आचार्यवीरभद्रपादांश्च-सिद्धान्तशिक्षकतया गुरुत्वेन व्याचक्षते । तेन कुवलयकारप्रस्तुतसूरिवर्य्ययोः समसमयोऽनुमीयते । कुवलयमाला च शकसप्त-शताब्द्यां वैक्रमनवमशताब्द्यां पूर्णा बभूवेति ज्ञायते प्रान्तश्लोकात्, तद्यथा—

' सगकाले वोलीणे, वरिसेण सएहिं सत्तहिं गएहिं । एगदिणेणूणेहिं, रइआ अवरण्हवेलाए ॥ " इति

तस्मादपि प्रस्तुतसूरिसुत्राम्णो विद्यमानताष्टमशताब्द्यामेव विभाव्यते' इति ।

एतदप्यव्याबाधागमयुक्तिमुद्गरेण सशकलं खण्डितं मन्तव्यम् । 'पमाणनाएण जस्स हरिभद्दो'इत्येतावच्छब्दमात्रेण प्रमाणन्या-यस्याध्यापकतया सूरिवरस्य प्रकल्पनं जंघालतया समुद्रलंघनमिव प्रतिभासते, तच्छब्दानां तादृगर्थपरत्वस्य स्वकपोलकल्प-नात्मकत्वात् । अपि तु श्रीहरिभद्रसूरिगुम्फितानेकप्रमाणन्यायग्रन्थस्याध्ययनेन संजातवैदुष्यवैभवा उद्योतनाचार्यवर्य्यास्तं सूरि-शार्दूलं गुरुतुल्यादरतया संस्मर्त्तुमनयारीत्या येतिरे इत्येव भावो निष्क्रष्टुं कथं न युज्यते। तस्मात् कुवलयमालाप्रशस्तिवचोभि-रपि कुवलयमाला भंकारप्रस्तुतसूरिवरयोः समकालसाधनं भंगभावमश्नुते । किं चोपमितिकुवलयमालानिष्ठप्रशस्तिवक्तव्याभ्यां श्रीमद्धरिभद्रसूरिवराणां श्रीसिद्धसाधुश्रीउद्योतनसूरयोरुभयोः समकालीनास्तित्वं साधयितुकामा वृद्धव्यजीर्णावगतमस्तकास्तयो-ग्रन्थकारयोस्त्रिंशदाधिकशतसंवत्सरस्यान्तरं कीदृश्या विद्वज्जनाश्चर्यकारिण्या पण्डया पूरयिष्यन्तीत्यपि महत् कुतुहलं वर्ततेऽस्माकम्।

यद्यप्युपमितिप्रान्तप्रशस्तौ प्रतिपादितसंवत्सरे तत्प्रवर्तकाभिधानं नोपलभ्यते तथापि स वैक्रमीय एवानुमीयते यतोऽन्यस्य तु संभाव्यमानत्वात्तत एवायता श्रीहरिभद्रसूरिपादानां विद्यमानताया अष्टमशताब्द्यां संभावनं बुद्धिमान्द्यग्रहग्रथिलत्वदशकत्वेनाकुशलसनातनम्। भूयांसि पुनः प्रस्तुतसूरिभूभृतामस्तित्वस्य षष्ठमशताब्दीकालीनस्य साधकानि प्रमाणान्यनल्पग्रन्थरत्नेषु चक्षुष्पथपान्थतां प्रयान्ति, तद्यथा—श्रीमन्मेरुतुङ्गाचार्याः स्वप्रणीतविचारश्रेण्यां प्राक्तनाचार्यगणातानुपदोक्तकारिकासमुद्धरयामासुः

" पचसए पणसीए, विक्कमकालाओ झत्ति अत्थमिओ। हरिभद्दसूरिसूरो, भवियाण दिसउ कल्लाणं " ॥ इति ॥

पुनरियमेवार्या पूज्यपादश्रीप्रद्युम्नसूरिविरचितविचारसारप्रकरणे श्रीसमयसुंदरोपाध्यायसदृष्टगाथामाहृत्या नेत्रायनसमवतरति। अत्र केचन कल्पनातृणपुञ्जसमर्पितधीधनाः अत्रत्य विक्रमपदस्य ,गुप्तपरत्न समावयितुं प्रयतन्ते स्वाभिमतससिद्धये तदपि मार्वसिद्धान्ताराममविततमानविविधवृक्षकार्थं तेषां चित्तालयवर्तिज्वालजिह्वज्वालां प्रकटीकरोति। परं त्विदंतान् प्रति स्तभनवचनं यदुतागमानुगामिशब्दानां स्वमत्यनुकूलपरिवर्तनानुकूलयुगस्य तत्रस्थप्रकाशमानपदानां यथेच्छार्थव्यावर्णनानुकूलयुगस्य वा प्रतीक्षार्थं दुश्चरतपश्चर्यां तपन्तु भो वराकाः। जैनज्योतिर्नाजन्यमानेऽस्मिन् युगे तद्युगस्य सुप्तावपि भ्रान्तिर्न संभावनीया चाञ्चरित्राचरणचमत्कृतचेतोनिपश्चिद्वृन्दारकवृन्दवन्दिताङ्घ्रिवारिजवाचयमाग्रेसरपूर्वाचार्यवक्तव्ये भ्रान्त्यादिदोषोद्भावनापेक्षया तु 'मतिरल्पा शास्त्रार्थं गहन' मिति न्यायेन स्वकीयानर्थककपोलकल्पनायामेव भ्रान्त्यादिदोषोद्भावनं स्फुटं पश्यन्तु चेत् सचक्षुष्का यूयमिति। सैन्यसत्तमश्रीकुलमण्डनसूरय स्वनिबद्धविचारामृतसंग्रहे तदेवाहुः
" श्रीवीरनिर्वाणात् सहस्रवर्षं पूर्वश्रुतं व्यवच्छिन्नं। श्रीहरिभद्रसूरयस्तदनु पञ्चपञ्चाशता वर्षैर्दिवं प्राप्ताः ॥" इति।

श्रीधर्मसागरोपाध्यायास्तपोगच्छपट्टावल्यामप्येतद्विषयकाशयं प्रकटयामासुः—"श्रीवीरात् पञ्चपंचाशदधिकसहस्रवर्षे विक्रमात् पंचाशित्यधिकपंचशतवर्षे याकिनीसूनुः श्रीहरिभद्रसूरिः स्वर्गभागिति"।

श्रीमद्धरिभद्रसूरिसंदृब्धलघुक्षेत्रसमासवृत्तिप्राक्तनप्रतिप्रान्तकारिकायामपि यत्पंचशतोत्तरसप्तपंचशतोद्वत्सरशुक्रशुक्लपंचमीशुक्रवासराद्युपलभ्यते तदप्येनमेवार्थं समर्थयतितराम्।

एतदर्थं सहस्रावधानसाधकश्रीमुनिसुंदरसूरिपादाः स्वपद्यगुर्वावल्यां समर्थयांचक्रुरनया रीत्या—

"अभूद् गुरुः श्रीहरिभद्रमित्रं, श्रीमानदेवः पुनरेव सूरिः। यो मान्द्यतो विस्मृतसूरिमंत्रं, लेभेऽम्बिकाऽऽस्यात्तपसोज्जयन्ते ॥"

अत्र श्रीमन्मुनिसुंदरसूरयः श्रीमद्धरिभद्रसूरिवरं श्रीमानदेवसूरिमित्रतया जगुः। तथा च पट्टावलीतः श्रीमानदेवसूरिप्रभोरस्तित्वं षष्टमशताब्द्यां निश्चीयतेतराम्। ततः श्रीहरिभद्रसूरिवरा अपि षष्टमशताब्दीं स्वास्तित्वेनालंचक्रुः। एतावत्सु प्रमाणेषु प्रस्तुतसुरिसुत्रामास्तित्वस्य षष्टमशताब्दीसाधकेषु विद्यमानेष्वपि य एतत्तथ्यवार्तामप्यपलपितुमुत्सहन्ते ते कीदृशा इति वाचकवृन्दा एवावधारयन्तु। तस्मात्सच्चतुश्चत्वारिंशदुत्तरचतुर्दशशतप्रकरणप्रणेतृप्रस्तुतटीकाकारश्रीमद्धरिभद्रसूरिसंक्रन्दनानामस्तित्वं निःशंकं षष्टमशताब्द्यां विश्राम्यति, प्राग्निराकृतत्वेन तद्बाधकप्रमाणाभावात् तत्साधकानेकप्रमाणसद्भावाच्चेति पर्यवसानमधिगम्यते।

अत्रापि केचनानार्यसंस्कृतिसंस्कृतहृदयाः सर्वज्ञागमशैल्यनभिज्ञास्तर्कयन्ति यदुत 'प्रस्तुतटीकाकारसूरिस्वामिनामनुपदोक्तग्रंथसंख्याप्रणेतृत्वमस्मादृशामिदानींतनकालीनासुमतां तु केवलं दृष्ट्याधिक्यपरिवेष्टितमर्थादतिशयोक्तिमयमेव प्रति-

भासते । नूनमेतद्विषयेऽष्टमनवमशताब्दीकालीनप्राक्तना' पाठा अपि नेत्रसरणिमानेतु पार्यन्ते । यद्यपि प्रतिपादितसदर्भ सख्याया कञ्चिदप्यर्थपरत्व भवतु तथाप्यपरिमितप्रकरणप्रणेतृत्व प्रस्तुतसूरिसुन्दराणां निर्निनादम्' इति लपन्ति। सत्यमेतत् खलु यत्करालकलिकालविकृतवात्याक्रांतचेतसा दुश्चरपचमहाव्रतसमापन्ननि स्पार्थिशिर शेखरचिरतनाचार्यपुरदरवचनेषु यदि भवभ्रमणनिबन्धनीभूतान्यथाभाव न स्यात्तर्हि परेषा केषां स्यात् । अत्रापि महदाश्चर्यमुपजायते खलु यदुत चतुश्चत्वारिंशदधिकचतुर्दशशतप्रकरणप्रणतृत्वमतिशयोक्तिमय समाम्यमाना ऐतिहासिकतत्वग्रहाग्रहग्रथिलमतयोऽपरिमितप्रकरणप्रणेतृत्व स्वकीयप्रतिभादर्शे शीघ्र प्रतिफलितु कया युक्त्या शक्नुवन्तीत्यपि विज्ञातु तैरेव पार्यते । अपरिमितप्रकरणप्रणेतृत्वापेक्षया तु पूर्वोक्तसख्यारूपपरिमितप्रणेतृत्व सुतरामनतिशयोक्तिमय विभावयितु शक्य प्रतिभाति । अत्रापि बलवत्तरागमप्रमाणप्रतिपादनास्तित्व जानन्तोऽपि तेऽश्रद्दधाना शरणार्थं जगच्चञ्चुचार्वाकपितामहमनुधावन्ति न वेति विचारणीय विचारवद्भि स्वयमेव ।

अथ ग्रथः कियद्दीर्घदिष्टात् प्रकाशयितुमारब्धोऽभवत् स च पुन' कारणवशात् दशपरिवत्सरप्रमाणदीर्घकालातिक्रमे प्राकारयपथानुकूलः कर्तु शक्यो भवतीति पश्यतु प्रेक्षाचञ्चुष्काः प्रकट । श्रीचूर्णिटीकोपेतस्य समग्रस्यास्य सदर्भस्य सशोधने प्राचीनानध्यपुस्तकसशोधनादिकार्यसमर्पितनिरतरजीवनश्रियामज्ञानान्धतमसापासनानन्यागमभानुप्रभासितहर्म्येरहर्मुखाभिस्मरणीयानुत्तममगलाभिख्याना दुश्चरतपश्चर्याचरणादिगुणप्रभवनिरतरानवरताविच्छिन्नप्रतापशालिनां तपागच्छाधिपतीनां पूज्यप्रवेकश्रीमद्विजयदानसूरीन्द्राणा परिश्रमपरिविधानाचक्षण मादृक्पामरजनवचनसामर्थ्यतिरस्कृतमेव । सर्वज्ञसाहित्य-

रत्नाकररचनारतस्यास्य पंचज्ञानविषयकसकलार्थसार्थस्याध्येतारोऽव्यानाधज्ञानसम्पादनैकग्रहा भवन्त्वित्यत्येवान्तेऽभिलष्यते ।

प्रांते ग्रन्थनस्यैतावता परिश्रमेन संशोधनेऽपि 'अवश्यं भाविनो दोषाः छद्मस्थत्वाद्यनुभावतः' इति वचनात्, मुद्रणादिदोषतश्चावशिष्टाशुद्ध्यर्थं निसर्गैकानुग्रहप्रियसहृदयहृदयानां गुणगणग्रहणाग्रहग्रहिलानां सानुनयमनुग्रहमाशास्यमानो विदधामीममुपन्यासं समाप्तिसरणिसन्मुखम् ॥

प्रव्रज्यापीयूषप्रपेचितृप्रवीणपाठकप्रकाण्डश्रीमत्प्रेमविजयगणिवर्य्यान्तेवास्यलंका—
राभिरूपानुत्तरश्रीमज्जम्बूविजय । चरणांभ्रीन्दीवरेन्दिन्दिरायमाणः ।

विनेयाणुरक्षितविजयः ।

सप्तसिद्धिनिधिक्षोणीमिते विक्रमवत्सरे । उपक्रांतिरियं पूर्णा मोहमय्यां विनिर्मिता ॥ १ ॥

॥ ७ ॥

॥ नमः श्रीमद्विजयानन्दसूरीश्वरपादारविन्देभ्यः ॥

॥ पूज्यश्रीजिनदासगणिमहत्तरसन्दब्धचूर्ण्या पूज्यश्रीहरिभद्रसूरीश्वरसन्दब्धवृत्त्या च सहितम् ॥

॥ श्रीनन्दीसूत्रम् ॥

चूर्णि'—ॐ नमो वीतरागाय । सव्वसुतखंधतादीण मंगलाधिकारे णंदि त्ति वत्तव्वा, णदण-णदी, नदति वा अणेण त्ति नदी, नंदी पमोदो हरिसो कदप्पो इत्यर्थः । तस्स य चउव्विधो णिक्खेवो, गपाओ णामठवणाओ, दव्वणदी-जाणगो अणुवउत्तो, अहवा जाणगभवियसरीरवतिरित्तो बारसविधो तूरसघातो इमो-" भंभा १ मुकुंद २ मद्दल ३ कडंब ४ झल्लरि ५ हुडुक्क ६ कंसाला ७। काहल ८ तिलिमा ९ वंसो १०, पणवो ११ संखो १२ य बारसमो ॥१॥ " भावणंदी-णंदिसद्दोवउत्तभावो, अहवा इमं पंचविहणाणपरूवगं ' णंदि ' त्ति अज्झयणं, तं च सुतसेण सव्वसुतब्भंतरभूतं, तं च सव्वसुतारंभेसु णिग्घोसमणत्थमादीए मंगलं पयुज्जति, तस्स य मंगलट्ठाणावसरपत्तस्स गुरो वा विणेयस्स अत्थसुणणोरुप्पादणत्थं अविच्छेदसताणागयमुयप्पदरिसणत्थं इमं थेरावलियं कहेत्ता ततो से अत्थं कधयति, सव्वसुतत्था य जतो तित्थकरप्पभवा, अतो भत्तीए पण्णवगसावगपढगचिंतणा य पढमताए णमोक्कारं करेत्ता भणति—

व्याख्या—नमः श्रीसर्वज्ञाय । जयति भुवनैकभानुः, सर्वत्राविहतकेवलालोकः । नित्योदितः स्थिरस्ताप-वर्जितो वर्धमानजिनः ॥१॥ इह सर्वेणैव संसारिणा सत्त्वेन नारकतिर्यङ्नरामरगतिनिबन्धनानेकशारीरमानसातितीव्रतरदुःखौघसङ्घातपीडितेन

नन्दी-शब्दस्य निक्षेपोऽर्थश्च.

जातिजरामरणशोकरोगाद्युपद्रवव्रातरहितनिरतिशयालोकसुखस्वभावापवर्गगतिसम्भवे सति पीडानिर्वेदात्तत्परित्यागाय निरति-
शयालोकसुखाभिलाषाच्च तदवाप्तये आत्मपरतुल्यचित्तेन सर्वथा स्वपरोपकाराय प्रवर्तितव्यमिति । तत्रान्यपरिरक्षणादिना
परोपकारपूर्वक एवात्मोपकार इति विशेषतस्तत्र । स पुनः परोपकारो द्विधा द्रव्यतो भावतश्च । तत्र द्रव्यतो भोजनादिविचित्र-
विभवप्रदानजनितः, अयं चानैकान्तिकोऽनात्यन्तिकश्च । भावतस्तु सद्धर्मप्रदानजनितः. अयं चैकान्तिकस्तथाऽऽत्यन्तिकश्च ।
सद्धर्मश्च श्रुतधर्मचारित्रधर्मभेदाद्द्विभेदः । तत्र श्रुतधर्मो–जिनवचनस्वाध्यायः, चारित्रधर्मस्तु–तदुक्तश्रमणधर्मः इति । उक्तं च—
" सुयधम्मो सज्झाओ, चरित्तधम्मो समणधम्मो " । तत्र श्रुतधर्मसंपत्समन्विता एव प्रायश्चारित्रधर्मग्रहणपरिपालनसमर्था भव-
न्तीति तत्प्रदानमेवादौ न्याय्यमिति । तत्रापि श्रुतप्रदाने सत्यपि नाविज्ञातार्थादेव तस्मादभिलपितार्थावाप्तिः प्राणिनामित्यतः
प्रारभ्यतेऽर्हद्वचनानुयोगः, अयं च परमपदप्राप्तिहेतुत्वाच्छ्रेयोभूतो वर्तते, श्रेयांसि (च) बहुविघ्नानि भवन्ति, यथोक्तम्–"श्रेयांसि
बहुविघ्नानि, भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥ १ ॥" इति । अतोऽस्य प्रारम्भ एव विघ्न-
विनायकोपशान्तये मङ्गलाधिकारे नन्दिर्वक्तव्यः । अथ नन्दिरिति कः शब्दार्थः ? उच्यते–' टुणदि समृद्धौ ' इत्यस्य धातोः
' इदितो नुम् धातोः ' (पाणिनि० ७–१–५८) इति नुमि विहितेऽनुबन्धलोपे च कृते उणादिकः ' इन् सर्वधातुभ्यः ' इति
वचनात्, [1]अनुबन्धलोपे च कृते सति नन्दि, (तस्मात्) [2]सुरुत्वं विसर्जनीयश्चेति (कृते सति) नन्दिः, नन्दनं नन्दिः, नन्दन्त
अनेनेति वा, नन्दन्ति अस्मिन्निति वा, नन्दयतीति वा, तदभेदोपचारान्नन्दिः हर्षः प्रमोदः इत्यनर्थान्तरम् । 'ताभ्यामन्यत्रोणादयः'

॥ १ ॥

१ न्. इत्यस्य लोपे. २ सोः सुप्रत्ययस्य रुत्वम्.

इति वचनात्, ताभ्यामिति सम्प्रदानापादानाभ्यामन्यत्र उणादयः प्रत्यया भवन्ति। अन्ये तु नन्दी इति अभिदधति, तत्रापि नन्दिरिति स्थिते 'इक् कृष्यादिभ्यः' (पा० वार्तिकम्) इति इक् प्रत्ययः, स च 'कृत्यल्युटो बहुलम्' (पा० ३-३-११३) इति वचनाद्भावे करणे वाऽवगन्तव्य इति। ततः '*कृदिकारादक्तिनः' '*सर्वतोऽक्तिन्नर्थादित्येके' इति स्त्रीप्रत्ययः, अस्य भावार्थ —कृदिकारान्तो यः शब्दः क्तिवर्जितः तस्मात्स्त्रीप्रत्ययो भवति, अपरे तु सर्वतोऽक्तिन्नर्थादिकारान्तात् स्त्रीप्रत्ययो भवतीति मन्यन्ते, अनुबन्धलोपे च कृते 'यस्य' (यस्येति च' पा० ६-४-१४८) इकारलोपे च नन्दी इति रूपं भवति। नन्दनं नन्दी, नन्दन्ति अनया इति वा भव्याः प्राणिन इति नन्दी इत्यलमप्रस्तुतातिप्रसङ्गेनेति।

अयं च नन्दिश्चतुर्विधः, तद्यथा—नामनन्दिः, स्थापनानन्दिः, द्रव्यनन्दिः, भावनन्दिश्चेति। तत्र नामस्थापने प्रकटार्थे। द्रव्यनन्दिर्द्विधा आगमतो नोआगमतश्च, तत्रागमतो नन्दिपदार्थज्ञः तत्र चानुपयुक्तः, 'अनुपयोगो द्रव्यम्' इति वचनात्। नोआगमतस्तु ज्ञशरीरद्रव्यनन्दिः, भव्यशरीरद्रव्यनन्दिः, ज्ञशरीरभव्यशरीरव्यतिरिक्तश्च द्रव्यनन्दिः। तत्र ज्ञशरीरद्रव्यनन्दिः नन्दिपदार्थज्ञस्य शरीरं जीवविप्रमुक्तम्, अनुभूतनन्दिभावत्वात् पश्चात्कृतभावस्य द्रव्यत्वात्, यथोक्तम्—"भूतस्य भाविनो वा, भावस्य हि कारणं तु यल्लोके। तद्द्रव्यं तत्त्वज्ञैः, सचेतनाचेतनं कथितम् ॥ १ ॥" भव्यशरीरद्रव्यनन्दिश्च नन्दिपदार्थपरिज्ञानभावयोग्यं बालादिशरीरं, पुरस्कृतभावत्वादस्य। व्यतिरिक्तः पुनः क्रियाविष्टो द्वादशविधस्तूर्याङ्गसङ्घातोऽयं, तद्यथा—"भंभा १ मउंद २ मद्दल ३, कडंब ४ झल्लरि ५ हुडुक्क ६ कंसाला ७। काहल ८ तलिमा ९ वंसो १०, संखो ११ पणवो १२ य बारसमो ॥१॥"

---

* एतद्वार्तिकद्वयं "बह्वादिभ्यश्च" पा० ४-१-४५ इतिसूत्रस्थम्

भावनन्दिरपि द्विविधैव (द्विविध एव) आगमतो नोआगमतश्च, तत्रागमतो भावनन्दिः नन्दिपदार्थज्ञस्तत्र चोपयुक्तः 'उपयोगो भावः' इति कृत्वा, नोआगमतस्तु भावनन्दिः पञ्चप्रकारज्ञानसमुदायः, नोशब्दो देशवचनः, अथवा पञ्चप्रकारज्ञानस्वरूपप्रतिपादकोऽध्ययनविशेषः, नोशब्दो देशवचन एव, अयं चाध्ययनविशेषः श्रुतांशेन सर्वश्रुताभ्यन्तरभूतो वर्तते, अत एव सर्वश्रुतारम्भेष्वेव विघ्नविनायकोपशान्तये मङ्गलार्थमभिधीयत इति, अस्य च मङ्गलस्थानावसरप्राप्तस्य सत आचार्या विनेयानां सूत्रार्थगौरवोत्पादनाविच्छेदेन सन्तानागतसूत्रार्थपददर्शनार्थं चादावेवावलिकामभिधाय व्याख्यानाय यतन्ते, सर्वश्रुतादौ च यतस्तीर्थंकरप्रभवा अतः प्रज्ञापकश्रावकपाठका अभिलषितार्थसिद्धये प्रवर्तमानाः प्रधानोपायत्वाद्भगवत एव नमस्कारपूर्वकं प्रवर्तन्त इत्यत आह ग्रन्थकारः—

जयइ जगजीवजोणी—वियाणओ जगगुरू जगाणंदो। जगणाहो जगबंधू, जयइ जगप्पियामहो भयवं ॥१॥

चूर्णिः—'जयइ' गाहा—सोतिंदियादिविसयकसायपरिसहोवसग्गुवघाति कम्मट्ठप्पगारं वा परप्पवादिणो य जतेसु वा 'जयति' त्ति भण्णति। 'जग'त्ति खेत्तभावो तम्मि जे जीवा तेसिं जाओ जोणीओ—सच्चित्तसीतसंवुडादिया चउरासीलक्खविहाणे वा विविहप्पगारेहिं जाणमाणो वियाणओ, अहवा जेहिं कम्मेहिं जीए जोणीए उववज्जइ, तं तहा जाणति त्ति विसिट्ठो जाणगो वियाणगो, अहवा जगग्गहणातो धम्माधम्मागासपोग्गलगहणं, 'जीव' त्ति सव्वजीवग्गहणं, 'जोणि' त्ति जीवाजीवुप्पत्तिट्ठाण, जहा य जं उप्पज्जति विगच्छति धुवं वा तं तथा सव्वं जाणति त्ति वियाणगो, अनेन वचनेन केवलणाणसामत्थतो सव्वभावे सव्वहा जाणति त्ति ख्यापितं भवति। 'जगगुरु' त्ति जगं ति सव्वसण्णिलोगो तस्स भगवानेव गुरुः, कथं? उच्यते—गृणाति शास्त्रार्थ-

मिति गुरुः ब्रवीतीत्यर्थः, तिरीयमणुयसदेवासुराए परिसाए धम्ममक्खाइ, जो वा जं पुच्छइ तं सव्वं कथयति तेण गुरू, अनेन वचनेन परोपकारित्वं प्रदर्शितं भवति। जगा–सत्ता ताण आणंदकारी 'जगाणंदो' कहं ? उच्यते–सव्वेसिं सत्ताण अनावायणोवदेसकरणत्ताओ, अतो भणितं–" सव्वे सत्ता ण हतव्वा, ण परियावेयव्वा, ण परिघेत्तव्वा, ण अज्जावेयव्व " त्ति विसेसता सण्णीण धम्मकथणत्ताओ आणंदकारी, ततोऽवि विसेसतो भव्वसत्ताण ति, अनेन वचनेन हितोपदेशकर्तृत्वं दर्शितं भवति। जगा–सत्ता ते अण्णेहिं परिभविज्जमाणा रक्खइ त्ति 'जगणाहो' कहं ? उच्यते–मणावयणकाएहिं कतकारिताणुमतेहिं रक्खंतो जगणाहो भवति, अनेन वचनेन सव्वपाणीण सणाहता दंसिता भवति। 'जगबंधु' त्ति जगा–सत्ता तेसिं बंधू जगबंधू, कहं ? उच्यते–जो अप्पणो परस्स वा आवतीए वि ण परिच्चयति सो बंधू, भगवं च सुट्ठु वि परीसहोवसग्गादिसु बाहिज्जमाणो वि सत्तेसु बधुत्तं अपरिच्चयतो ण विराहेति त्ति, अतो जगबंधू, अनेन वचनेन सव्वसत्तेसु सुबंधुता दंसिता भवति। '(जग) पितामहो' त्ति जो पितु पिता स पितामहो, सो य भगवं चेव सव्वसत्ताण पितामहो, कहं ? उच्यते–सव्वसत्ताण अहिंसादिलक्खणो धम्मो पिता रक्खणत्तातो, सो य धम्मो भगवता पणीतो, अतो भगवं धम्मपिता, एवं च सव्वसत्ताण भगवं पितामहो त्ति, अनेन वचनेन धम्मं पडुच्च आदिपुरिसत्तं ख्यापितं भवति। एताए गाहाए पच्छद्धस्स पाढंतरं इमं–" जिणवसभो सललियवसभविक्कमगती महावीरो " जिण एव वसभो जिणवसभो, वसभो त्ति संजमभारुव्वहणे चक्कमतो सुभा गायसचालणक्रिया स ललितं भण्णति, वामदाहिणाण वा पुरिमपच्छिमचलणाण जं चंक्कमुक्खेवकरणं स विक्कमतो भण्णति, दुपदस्स पुण एगचलणुक्खेवो चेव विक्कमो। सेसं कंठं ॥ १ ॥ किं च

व्याख्या—'जयति' गाथा—इन्द्रियविषयकषायघातिकर्मभवोपग्राहिकर्मशत्रुगणजयाज्जयतीत्युच्यते। किंविशिष्टो जयति? 'जगज्जीवयोनिविज्ञायकः' इह जगच्छब्देन सकलधर्माधर्माकाशपुद्गलास्तिकायपरिग्रहः, जीवशब्देन तु सकलजीवास्तिकायपरिग्रहः, उक्तं च—"जगन्ति जङ्गमान्याहुः, जगज्ज्ञेयं चराचरम्"। योनयः सचित्ताद्याः, उक्तं च—"सचित्तशीतसंवृत्तेतरमिश्रास्तद्योनयः" जीवोत्पत्तिस्थानानीत्यर्थः। 'यु मिश्रणे' युवन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकादिशरीरेण मिश्रीभवन्त्यस्यामिति योनिः, उक्तं च—"जोएण कम्मएणं, आहारेइ अणंतरं जीवो। तेण परं मीसेण, जाव सरीरस्स णिप्फत्ती ॥१॥" ततश्च जगच्च जीवाश्च योनयश्च जगज्जीवयोनयः, विविधं—अनेकधोत्पादाद्यनन्तधर्मात्मकं जानातीति—विज्ञायकः, इति समासः, अनेन केवलज्ञानप्रतिपादनात् स्वार्थसम्पदमाह। तथा जगत् गृणातीति जगद्गुरुः यथोपलब्धजगद्वक्तेति भावना, अनेनापि स्वार्थसम्पदमेवाह। तथा 'जगदानन्दः' इह जगच्छब्देन [1]संज्ञिजङ्गमपरिग्रहः, तेषां सद्धर्मदेशनाद्वारेणानन्दहेतुत्वादैहिकामुष्मिकप्रमोदकारणत्वात् जगदानन्द इति, अनेन परार्थसंपदमाह। तथा 'जगन्नाथः' इह जगच्छब्देन सकलचराचरपरिग्रहः, तस्य यथावस्थितस्वरूपप्ररूपणद्वारेण वितथप्ररूपणापायेभ्यः पालनात् नाथवत् नाथ इति, अनेनापि परार्थसम्पदमिति। तथा 'जगद्बन्धुः', इह जगच्छब्देन सकलप्राणिपरिग्रहः, तदव्यापादनोपदेशप्रणयनेन सुखस्थापकत्वात् बन्धुवत् बन्धुः, तथा चोक्तम्—"सव्वे पाणा, सव्वे भूया, सव्वे जीवा, सव्वे सत्ता, ण हंतव्वा, ण अज्जावेयव्वा, ण परितावेयव्वा, ण उवद्दवेयव्वा, एस धम्मे धुवे णिनीए सासते समेच्च लोयं खेदण्णेहिं पवेदिते" इत्यादि, अनेनापि परार्थसम्पदमिति। तथा 'जयति जगत्पितामह' इति, इह जग-

---

१ पञ्चेन्द्रिय इति वा पाठः क्वचित्

ञ्छब्देने सकलसत्त्वपरिग्रह एव, तेषां च कुगतिगमनभयापायरक्षणात् पिता धर्मो वर्तते, तथा चोक्तम्-" दुर्गतिप्रसृतान् जीवान्, यस्माद्धारयते तत । धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म इति स्मृत. ॥ १ ॥" तस्यापि चार्थप्रणेतृत्वेन भगवान् पिता वर्तते, अतो जगत्पितामह इति। स्तवाधिकाराच्च पुन क्रियाभिधानमदुष्टम्, उक्तं च-" सज्झायज्झाणतव-ओसहेसु उवएसथुइपयाणेसु । सन्तगुणकित्तणेसु य, न होति पुणरुत्तदोसाओ ॥ १ ॥" अनेनापि परार्थसम्पदमाह । 'भगवा' इति, समग्रैश्वर्यादिलक्षण', तथा चोक्तम्-"ऐश्वर्यस्य समग्रस्य, रूपस्य यशस श्रिय । धर्मस्याथ प्रयत्नस्य, षण्णा भग इतीङ्गना ॥ १ ॥ " भगोऽस्यास्तीति भगवानिति, अनेन चोभयसम्पदमाह, स्वपरोपकारत्वादैश्वर्यादे, इत्यल प्रसङ्गेनेति गाथार्थ ॥ १ ॥ " व्याख्यानयन्ति केचित् स्तुतिमनाम यथाऽपि विद्वास, तत्राप्यपौनरुक्त्य सूक्ष्मधिया चिन्तनीयमिति ।

एवं तावदनादिमन्तो प्रतास्तीर्थकरा इति ज्ञापनार्थं सामान्येन नमस्कारमभिधाय साम्प्रतमासन्नोपकारित्वात् सकलदु'खपरमौषधभूतप्रवचनप्रणेतृत्वाद्वर्तमानतीर्थाधिपतेर्नमस्कार प्रतिपादयन्नाह—

जयइ सुआण पभवो, तित्थयराण अपच्छिमो जयइ। जयइ गुरू लोगाणं, जयइ महप्पा महावीरो ॥२॥

चूर्णि'—'जयइ सुताण' गाहा-रागदोसादि अरी जिणतो जितेसु वा जयति त्ति सव्व, 'सुताण' ति सुतणाणत्थो भगवं-सातो 'पभवा' त्ति पसूती, अणिट्ठनयणपरिहारातो पच्छिमा त्ति अपच्छिमो भण्णति, अहवा पच्छाणुपुव्वीए अपच्छिमो रिसभो पच्छिमो, अविसिट्ठजीवलोगस्स विसिट्ठसण्णिजीवलोगस्स वा, अहवा सम्मदिट्ठीमादि सजतासजतलोगस्स गुरू, मह आया जस्स सो महप्पा, सो य अकम्मवीरियसामत्थतो महात्मा, केवलादिविसिट्ठलद्धिसामत्थतो वा महात्मा ॥ २ ॥ किं च—

व्याख्या—'जयइ सु' गाहा–जयतीति पूर्ववत् । श्रुतानां–आचारादिभेदभिन्नानां प्रभवः प्रभवन्त्यस्मादिति प्रभवः–तदर्था-
भिधायकत्वात्कारणमित्यर्थः । ऋषभादयोऽप्येवम्भूता एव अत आह–तीर्थकराणामपश्चिमो जयति, तत्र तीर्थकरणशीलास्तीर्थकराः
तेषां तीर्थकराणां भरतेऽधिकृतावसर्पिण्यां पश्चिम एव अनिष्टशब्दपरिहारार्थमपश्चिम इत्युच्यते. पश्चानुपूर्व्या वाऽपश्चिम इति ।
जयति गुरुर्लोकानां गृणाति शास्त्रार्थमिति गुरुः, लोकानामिति–सत्त्वानां जयति । महात्मा–अनन्तज्ञानवीर्ययुक्तत्वात् महान् आ-
त्मा यस्य स महात्मा महावीर इति 'शूर वीर विक्रान्तौ' इति कषायादिशत्रुजयात् महाविक्रान्तो महावीरः, 'ईर गतिप्रेरणयोः'
इत्यस्य वा विपूर्वस्य, विशेषेण ईरयति कर्म गमयति याति वेह शिवमिति वीरः, महांश्चासौ वीरश्च महावीर इति गाथार्थः ॥२॥

पुनरस्यैवातिशयप्रदर्शनद्वारेण स्तुतिमभिधित्सुराह—

भद्दं सव्वजगुज्जोयगस्स, भद्दं जिणस्स वीरस्स । भद्दं सुरासुरनमंसियस्स, भद्दं धुयरयस्स ॥ ३ ॥

चूर्णिः—'भद्दं सव्व' गाहा–भावतो भाविता भद्द तं भगवतो भवतु त्ति लोगो अट्ठविधोऽवि लोगनिक्खेवो भणितव्वो,
सेसं कंठं ॥ ३ ॥ इमं संघस्सेव णगररूवगं—

व्याख्या—'भद्दं' गाहा–भद्रं–कल्याणं भवतु । कस्य ? सर्वजगदुद्योतकस्येति अनेन ज्ञानातिशयमाह । इह च " चतुर्थी
चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः" (पा० २–३–७३) इतिवचनात् षष्ठ्यपि भवत्येव, यथा आयुष्यं देवदत्ताय आयुष्यं
देवदत्तस्येति, एवं मद्रादिष्वपि वक्तव्यमिति । भद्रं जिनस्य, 'जि जये' अस्य औणादिकनक्प्रत्ययान्तस्य जिन इति भवति,
रागादिजयात् जिनः इति, अनेनापायातिशयमाह । अपायो–विश्लेषः, रागादिभिः सार्धमात्यन्तिकवियोग इत्यर्थः । आह–अपा-

यातिशये सति ज्ञानातिशयभावात् व्यतिक्रम किमर्थं ? 'फलप्रधाना' समारम्भा' इति ज्ञापनार्थम् । भद्र सुरासुरनमस्कृतस्य इति, अनेन पूजातिशयमाह, न हि विभवानुरूपा पूजामकृत्वैव सुरासुरा नमस्कारक्रियाया प्रवर्तन्ते इति, उक्त च– ' अशोकवृक्ष सुरपुष्पवृष्टि–र्दिव्यो ध्वनिश्चामरमासन च । भामण्डल दु दुभिरातपत्र, सत्प्रातिहार्याणि जिनेश्वराणाम् ॥ १ ॥" इति । पूजातिशया यथानुपपत्त्यैव वागतिशयो गम्यत । भद्र धुतरजस इति, अनेन सकलससारक्लेशविनिर्मुक्ता सिद्धावस्थामेवाह । यतो बध्यमानक कर्म रजो भण्यते, तदभावस्त्वयोगिसिद्धानामेव, न पुनरन्येषा, यत आह–" जाव ण एस जीवो एयइ वेयइ चलइ फदइ (घट्टइ खुब्भइ उदीरइ त त भाव परिणमइ,) ताव ण अट्ठविहबधए वा, सत्तविहबधए वा, छव्विहबधए वा, एगविहबधए वा" इत्यादि, तत्र–"सत्तविहबधगा होति, पाणिणो आउवज्जगाण तु । तह सुहुमसपराया, छव्विहबधा विणिदिट्ठा ॥१॥ मोहाउयवज्जाण, पयडीण ते उ बधगा भणिया । उवसतखीणमोहा, केवलिणो एगविहबधा ॥२॥ ते पुण दुसमयठिइयस्स, बधगा न उण सपरायस्स । सेलेसीपडिवन्ना अबधगा होति विन्नेया ॥ ३ ॥" आह–भगवत ससारातीतत्वात् परमकल्याणरूपत्वात् किमेवमुच्यते भद्र भवतु (इति) ? न च 'स्तोत्रा भणित सर्वमेव (तथा) भवतीति, अत्रोच्यते–सत्यमेतत् तथापि कुशलमनोवाक्कायप्रवृत्तिकारणत्वान दोष इत्यल प्रसङ्गेन । इति गाथार्थ ॥ ३ ॥ एव तावत्तीर्थकरनमस्कारा' प्रतिपादिता , साम्प्रत तीर्थकरानन्तर सङ्घ इति कृत्वा तीर्थान्तरग्रामव्युदासेन नगररूपकेण तत्सस्तव कुर्वन्नाह—

गुणभवणगहण ! सुयरयणभरिय ! दसणविसुद्धरत्थागा । सघनगर ! भद्द तॆ अखण्डचारित्तपागारा ! ॥४॥

---

१ स्तुतिकारेण

चूर्णिः—'गुणभवणगहण' गाहा–तम्मि पुरिससंघणगरे इमे गुणा–पिंडविसुद्धिसमितिगुत्तिदव्वादिअभिग्गहमासादिपडिमा-गोयरे य चरगादिया एमादि उत्तरगुणा। तम्मि संघणगरे भवणा कथी 'भवण' त्ति घरा तेहिं 'गहण' त्ति–णिरंतरसंठिया घणा तं च संघपुरिसणगरं अंगाणंगादि विचित्तसुत्तरयणभरिय खयोवसमितादिसंमत्तमइयरत्थाक्त या मिच्छत्तादिकयवरवज्जियत्त-णतो विसुद्धाओ। मूलगुणचरितं च से पागारो, सो य 'अखंडो' त्ति अविराधितो निरतिचार इत्यर्थः। सेसं कंठं ॥ ४ ॥ संघ-स्सेव इमं चक्करूवगं—

व्याख्या—'गुण' गाहा–गुणभवनगहन! इह गुणाः–पिण्डविशुद्ध्यादय उत्तरगुणा अभिगृह्यन्ते, यथोक्तम्–"पिंडस्स जा विसोही समिईओ भावणा तवो दुविहो। पडिमा अभिग्गहा वि य उत्तरगुणमो वियाणाहि ॥ १ ॥" एत एव भवनानि, एभिर्गहनं प्रचुरत्वादुत्तरगुणानाम् एभिः सङ्कुलं सङ्घनगरमभिगृह्यते, तस्यामन्त्रणं हे गुणभवनगहन! तथा श्रुतरत्नभृत! श्रुतान्ये-वाचारादीनि निरूपमसुखहेतुत्वाद्रत्नानि, तैर्भृतं पूरितमित्यर्थः, तस्यामन्त्रणम्। तथा दर्शनविशुद्धरथ्याक! इह दर्शनं–प्रशम-संवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं सम्यग्दर्शनं गृह्यते, तच्चोपशमिकादिभेदात् पञ्चविधं, तथा चोक्तम्–"तं च पंचहा सम्मं उवसमं सासायणं खओवसमियं वेदयं खइयं" ति दर्शनमेव असारमिथ्यात्वादिकचवररहिता शुद्धा रथ्या यस्य तत् तथाविधं, तस्यामन्त्रणं सङ्घनगर! सङ्घः–चातुर्वर्णः श्रमणादिसङ्घातः, स नगरमिव सङ्घनगरं, तस्यामन्त्रणं, यथा पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः, उक्तं च "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (पा० २–१–५६) भद्रं–कल्याणं तव भवतु, अखण्डचारित्रप्राकार! चारित्रं मूलगुणाः, अखण्डं–अविराधितं चारित्रमेव प्राकारो यस्य तत्तथाविधं, तस्यामन्त्रणम्। इति ॥ ५ ॥

गाथार्थः ॥ ४ ॥ ससारोच्छेदस्यिाम्भकस्यैव चरकारेण स्व इत्याह—

संजमगुणधारयस्स, तओ सम्मत्तपारियकप्पस्स। अप्पडिबद्धस्स जओ, होइ सया संजमस्स ॥५॥

चूर्णि —'संजम' गाथा-विशुद्धाचारस्य सारगतियो संजमो ध्रुव, तस्य सारगविरो तओ परमरता, पारियत्त' ति आ चारित्रगुणस्य चारित्रमयी से सम्मं तं, तस्स अन्नेहिं सारणादिएहिं जेउ ण भवति, तस्स एवं जयति, अपडिबद्धं च एवमयो परिगम पडम्मेति ॥ ५ ॥ इदं तस्स ददस्याह—

व्याख्या-' संयम ' गाथा-संयमतत्त्वगुणारकाय नमः सदा । तानि च संयमस्थानानि, गुणे धारकाय गुणधारका, तत्र समासः । संयमसाधने गुणधारका यस्य साधवादिः, तस्ये नव, तत्र प्रथमा (सा) पञ्चास्रवाद्विरमणं पञ्चेन्द्रियनिग्रह (चतुः) कषायजयः दण्डत्रयविरतिश्चेति सप्तदश भवान्तरे, तथा द्वादशप्रकारं सामाभ्यन्तरं (?), तत्र यानं पद्धति, यथोक्तं-" अन-शनादिनग दृष्टव्यविरतिश्चेति सप्तम पापराभर, एवा द्वादशमकारं सामाभ्यन्तरं (?), तत्र सार्थं पडिपत्ति, उक्त च-नन्दसूत्रेदृशता, इत्य अरुणा रागाण । सामग्रयोः न शीत-तोरि यानं रा योकम् ॥१॥" भावनानमपि परिषह्, उक्त च-'मासभिण निवा वैराग्य रागरता ध्याने व्युत्सर्गमेति" । ' सम्मत्तपारियकप्पस्स ति' पारियन्ते चारगुणस्य (पुरुष) तथा भविकस्यापि, तस्य सम्यक् स्वाध्यायप्रमित्ते सा । तस्यासौ गाथार्थम् । तरकादिविविधमत्ताभाव्य भतिकं निपत दातविन्के, तस्य तथा भाव इति गुणनिधानमेतद्, यदा-गर्भकाले सहाककमिव सङ्करके तस्य, इति गाथार्थः ॥ ५ ॥ इदानीं सदृशैव सारगादिराया सम्यक्त्व स्व इत्याह—

श्रीनन्दीसूत्रस्य चूर्णिवृत्तिश्च ॥ ६ ॥

संघस्य चक्रेणौपम्यम् रथेनौपम्यम्

भद्दं सीलपडागूसियस्स, तवनियमतुरयजुत्तस्स। संघरहस्स भगवओ, सज्झायसुनंदिघोसस्स॥६॥

चूर्णिः—'भद्दं सील' गाहा—रहो सामण्णतो पंचमहव्वतमइओ, 'उस्सितो त्ति' तस्सट्ठारससीलंगसहस्सूसिता कता पडागा। बारसविहो तवो इंदियनोइंदियो य णियमा, एते अस्सा। सज्झायसद्दो णंदिघोसो। सेसं कंठं ॥इमंपि॥६॥ संघस्सेव पउमरूवगं—

व्याख्या—'भद्दं' गाहा—भद्रं—कल्याणं भवतु, कस्य ? सङ्घरथस्य भगवत इति योगः। किंविशिष्टस्य ? शीलोच्छ्रितपताकस्य प्राकृतशैल्याऽन्यथापन्यासः, शीलग्रहणादष्टादशशीलाङ्गसहस्रपरिग्रहः। तपोनियमतुरगयुक्तस्य—तपःसंयमाश्वयुक्तस्येत्यर्थः। (तथा) स्वाध्यायो—वाचनादिः, यथोक्तम्—"वाचना प्रच्छना परावर्तनाऽनुप्रेक्षा धर्मकथा चेति", तत्र स्वाध्याय एव शोभनो नन्दिघोषः—तूर्यरवः '[1]नेमिनिर्घोषो वा यस्य स तथा तस्य। इह च शीलाङ्गनिरूपणे सत्यपि तपोनियमनिरूपणं प्रधानपरलोकाङ्गत्वख्यापनार्थम्, अस्ति चायं न्यायो यदुत "सामान्योक्तावपि प्राधान्यख्यापनार्थं विशेषाभिधानम्" इति. यथा ब्राह्मणा आयाता वशिष्ठोऽप्यायात इत्येवमन्यत्रापि योजनीयमित्यलं प्रसङ्गेनेति गाथार्थः ॥ ६ ॥ सङ्घस्यैव कोशाकारसंस्थितत्वात् पद्मरूपकेण स्तवं प्रतिपादयन्नाह—

कम्मरयजलोहविणिग्गयस्स, सुयरयणदीहनालस्स। पंचमहव्वयथिरकन्नियस्स गुणकेसरालस्स ॥७॥

सावगजणमहुअरिपरिवुडस्स जिणसूरतेयबुद्धस्स। संघपउमस्स भद्दं, समणगणसहस्सपत्तस्स ॥८॥ ॥ ६ ॥

चूर्णिः—'कम्मरय' गाहा ('सावग' गाहा य)—कम्म एव रयो कम्मरयो, अहवा जं पुव्वं बद्धं तं कम्मं, बज्झमाणं रयो,

१ अयमर्थः 'सज्झायसुनेमिघोसस्स' इति पाठान्तरे द्रष्टव्यः

स सव्वंपि जलोहम्मि कप्पते, अहवा पुव्ववद्ध कम्मपको, वज्झमाणं जलोहो, ततो विणिग्गतो सयपउमो। तस्स नालो सुत एव रयण सुतरयण, तं से णालो कतो। पचमहव्वता य से 'थिर त्ति' दढा ते 'कण्णिय त्ति' बाहिरपत्ता कता। मूलुत्तरगुणा य से अणेगविहा तेहिं गुणेहि 'आलस्स त्ति' अधिकयोगयुक्तस्य गुणकेसरालस्स–मूलादिगुणकेसरयुक्तस्येत्यर्थः। वितिय गाहाए 'परिवुड त्ति' परिवारितं। जिणसूरस्स धम्मकहणरकाणतेयेण पवोधित। अणेगसमणसहस्सा य से अब्भितरपत्ता कता। एरिसस्स सयपउमस्स भद्द भवतु ॥ ७–८ ॥ इम चदसयरूवग—

व्याख्या—'कम्मरय' गाहा 'सावय' गाहा (च)–सङ्घपद्मस्य भद्र–मङ्गल भवत्विति क्रिया। किम्भूतस्य ? कर्मरजोजलौघविनिर्गतस्य, इह ज्ञानावरणादिलक्षण कर्म, तदेवानेकधा जीवगुण्डनात् रजो भण्यते, तदेव भवकारणत्वाज्जलौघस्तस्माद्विनिर्गत इव निर्गत, तथा चाविरतसम्यग्दृष्टेरपि अपार्धपुद्गलपरावर्तपर ससार उक्त इत्यतो विनिर्गतस्तस्य। श्रुतरत्नमेव दीर्घनाल यस्य स, तद्बलादेव निर्गत इति भावनीयम्। पञ्चमहाव्रतानि प्राणातिपातादिविनिवृत्तिलक्षणानि, तान्येव स्थिरा–दृढा कर्णिका–मध्य गण्डिका यस्य। गुणा–उत्तरगुणा त एव तत्परिकरत्वात् केसराणि यस्य विद्यन्त इति गुणकेसरवत् तस्य गुणकेसरवत। श्रावकजनमधुकरीपरिवृतस्येति प्रकटार्थ, नवरमभ्युपेतसम्यक्त्व· प्रतिपन्नाणुव्रतोऽपि प्रतिदिवस यतिभ्य' सकाशात् साधूनामगारिणां च सामाचारीं शृणोतीति श्रावकः, उक्त च–" यो ह्यभ्युपेतसम्यक्त्वो, यतिभ्यः प्रत्यहं कथाम्। शृणोति धर्मसम्बद्धामसौ श्रावक उच्यते ॥ १ ॥ " जिनसूर्यतेजोबुद्धस्य केवलज्ञानभास्करविशिष्टसवेदनप्रभवधर्मदेशनाबुद्धस्येति भावार्थ। श्रमणगणसहस्रपत्रस्येति प्रकटार्थमेव, नवर श्राम्यतीति श्रमण·, " कृत्यल्युटो बहुलम् " (पाँ० ३–३–११३) इतिवचनात्कर्तरि ल्युट्, श्राम्यतीति–तप

स्यति एतदुक्तं भवति–प्रव्रज्यादिवसादारभ्य सकलसावद्ययोगविरतो गुरूपदेशादनशनादि यथाशक्त्या[1] प्राणोपरमात्तपश्चरतीति श्रमणः, उक्तं च–" यः समः सर्वभूतेषु, स्थावरेषु त्रसेषु च । तपश्चरति शुद्धात्मा, श्रमणोऽसौ प्रकीर्तितः ॥१॥ " इति गाथा-द्वयार्थः ॥ ७-८ ॥ इदानीं सङ्घस्यैव सौम्यतया चन्द्ररूपकेण स्तवमाह—

तवसंजममयलंछण, अकिरियराहुमुहदुद्धरिस निच्चं । जय संघचंद ! निम्मल–सम्मत्तविसुद्धजोण्हागा ॥९॥

चूर्णिः—'तवसंयम' गाहा–संघचंदस्स मिया तवसजमा तेहिं लंछितो । 'अकिरिय त्ति' णत्थियवादी से राहुमुहं तेहिं 'दुआधरिसो त्ति' ण सक्कते जेतुं 'णिच्चं' ति सव्वकालं, संकादिविसुद्धसम्मत्तं से जोण्हा । सेसं कंठं ॥ ९ ॥ सूरसंघरूवगं इमं—

व्याख्या—'तवसंयम' गाहा–तपःसयममृगलाञ्छन–तपःसंयममृगचिह्न !, अक्रिया (य) राहुमुखदुष्प्रधृष्य, इह अक्रिया (य) शब्देन नास्तिका गृह्यन्ते, अनभ्युपगमात् अविद्यमानपरलोकक्रियाः अक्रियाः, त एव राहुमुखं, तेन दुष्प्रधृष्योऽनभिभवनीयस्त-स्यामन्त्रणं । नित्यमिति सदा जय सङ्घचन्द्र निर्मलसम्यक्त्वविशुद्धज्योत्स्नाक इह मिथ्यात्वभावतमोरहितं[2] निर्मलं सम्यक्त्वमुच्यते, तदेव विशुद्धा–निर्मला ज्योत्स्ना–यस्य स तथाविधः तस्यामन्त्रणम् । इति गाथार्थः ॥ ९ ॥ अधुना सङ्घस्यैव प्रकाशकतया सूर्य-रूपकेण स्तवमाह—

परतित्थियगहपहनासगस्स, तवतेयदित्तलेसस्स । नाणुज्जोयस्स जए, भद्दं दमसंघसूरस्स ॥ १० ॥

---

१ यथाशक्ति आ इति पदच्छेदः २ भावमलरहितं इति वा पाठः

चूर्णि —'परतित्थिय' गाहा-हरिहरहिरण्णगब्भोलूकचरगतावसादयो परतित्थिया गहा तेसिं णाणतेयप्पभं सुतादिणाणप्प भाए णासेति, तवणियमकरणातो य अतीव दित्तिमतलेस्सो 'लेस्स'त्ति रस्सीया सुतादिणाणुज्जोतसपण्णस्स य इमम्मि जए संघ सूरस्स भद्द भवतु। सेसं कंठ ॥ १० ॥ इमं संघसमुद्दरूवगं—

व्याख्या— परतित्थिय' गाहा-परतीर्थिकग्रहप्रभानाशकस्य इह परतीर्थिकाः कपिलकणभक्षाक्षपादादिमतावलम्बिनः त एव ग्रहास्तेषां प्रभा एकदुर्णयज्ञानलक्षणा, तां नाशयति अनन्तनयसङ्कुलप्रवचनसमुत्थज्ञानालोकेन अपनयतीति समासः तस्य। तपस्ते-जोदीप्तलेश्यस्य तपस्तेज एव दीप्ता-उज्ज्वला लेश्या-दीधितयो यस्य। ज्ञानोद्योतस्येति गतार्थम्। जगति-लोके भद्र-मङ्गलं भवतु। कस्य ? दमसङ्घसूर्यस्य दम-उपशमो भण्यते, तत्प्रधानः सङ्घसूर्यः दमसङ्घसूर्यः तस्य। इति गाथार्थः ॥ १० ॥ साम्प्रतं सङ्घस्यैव महत्तया समुद्ररूपकेण स्तवमाह—

भद्दं धिइवेलापरिगयस्स, सज्झायजोगमगरस्स। अक्खोहस्स भगवओ, संघसमुद्दस्स रुंदस्स ॥ ११ ॥

चूर्णि —'भद्द' गाहा-जलवेदिअंतरे जं रमणं सा वेला, सा य मेरा वि भण्णति, एवं संघसमुद्दस्स धितीवेला ताए परिवुडो त्ति वेढ्ढितो वायणादिसज्झायजोगकरणं मगरो परप्पवादोपसग्गादिभिर्न क्षुभ्यति। रुंदा-महंतो। सेसं कंठं ॥ ११ ॥ इमं संघस्स मेरुरूवगं—

व्याख्या—'भद्द' गाहा-सङ्घसमुद्रस्य भद्रं भवत्विति क्रिया। किम्भूतस्य ? धृतिवेलापरिगतस्य धृतिः-आत्मपरिणामः सैव वेला-वेदिका जलान्तररमणलक्षणा मर्यादा वा, तया परिगतः तस्य। स्वाध्याययोगमकरस्य कर्मविदारणमहाशक्तियुक्तत्वाद्

स्वाध्याय एव मकरो यस्मिंस्तस्य । अक्षोभ्यस्य–परीषहोपसर्गसम्भवे निष्प्रकम्पस्य । भगवतः–समग्रैश्वर्यादियुक्तस्य । रुन्दस्येति–विस्तीर्णस्येति गाथार्थः ॥ ११ ॥ इदानीं सङ्घस्यैव स्थिरतयाऽचलेन्द्ररूपकेण स्तुतिं कुर्वन्नाह–

सम्मदंसणवरवइर–दढरूढगाढावगाढपेढस्स । धम्मवररयणमंडिय–चामीयरमेहलागस्स ॥ १२ ॥
नियमूसियकणयसिला–यलुज्जलजलंतचित्तकूडस्स । नंदणवणमणहर–सुरभिसीलगंधुद्धुमायस्स ॥ १३ ॥
जीवदयासुंदरकंदरु–द्दरियमुणिवरमइंदइन्नस्स । हेउसयधाउपगलंत–रयणदित्तोसहिगुहस्स ॥ १४ ॥
संवरवरजलपगलिय–उज्झरपविरायमाणहारस्स । सावगजणपउररवंतमोरनच्चंतकुहरस्स ॥ १५ ॥
विणयनयपवरमुणिवरफुरंतविज्जुज्जलंतसिहरस्स । विविहगुणकप्परुक्खगफलभरकुसुमाउलवणस्स ॥ १६ ॥
नाणवररयणदिप्पंतकंतवेरुलियविमलचूलस्स । वंदामि विणयपणओ संघमहामंदरगिरिस्स ॥ १७ ॥

चूर्णिः—तस्स य पव्वतस्स इमे रूवगा, तस्स य पव्वयस्स इमे अवयवा–पेढं मेहला उस्सयो सिला मेहला मुत्तसडा. मेहलाए वणं गुहा, गुहासु य मइंदा, सुवण्णादिधातवो, नाणाविधवीरियोसहिपज्जलितो णिज्झरा य सलिलजुत्ता कुहरा य से मयूरादिपक्खिउवसोभिता अणुवग्घातिविज्जुलतोवसोभितो य सो कप्पादिरुक्खसुवसोभितो य अंतरंतरेसु य वेरुलितादिरतणसोभितो एतेस पदाण पडिरूवेण इमाहिं छहिं गाहाहिं उवसंहारो–'सम्मदंसण' गाहा, 'णियमू' गाहा, 'जीवदया' गाहा, 'सवर' गाहा, 'विणय' गाहा, 'णाणावरण' गाहा । संघपव्वतस्स सम्मदंसणं चेव वइरं, तं च संकादिसल्लरहियत्तणयो दढं ति रूढं

ति वडि्त, कहं ? विसुज्झमाणत्तणतो 'गाढ'ति—अतीव 'अवगाढ'ति—ओगाढ सद्दहाणत्तणतो जीवादिपदत्थेसु अतीव ओगाढ ति वुत्त भवति, एत पेन्न । धम्मो दुविहो मूलुत्तरगुणेसु, सो य दुविहोऽवि वरोत्ति—पधाणो, तत्थुत्तरगुणधम्मो रयणा, तेहिं मडिता जे मूलगुणा ते चामीकर ति—सुवण्ण तम्मयी मेखला तया जुत्तस्स मेहलागस्स । नियमो त्ति इदिरनाइदिएसु अणेगविरा सा य णियमो सिलायलो तेहिं चेव उस्सितो असुभज्झवसाणविरहितत्तणतो कम्मविसुज्झमाणत्तणता वा उज्जलसुत्तत्थाणुसरणत्तणता जन्नति चित्त, चिंतिज्जइ जेण त चित्त, त चेव कूड सि चित्तकूडस्स । णदति जेण वणयरजोइसभवणवेमाणिया विज्जाहरमणुया य तेण णंदण, वण ति—वणसन्न, त च लतावल्लिविताणणेगसठाणसंठितेहि गहण, पत्तपल्लवपुप्फफलोववेतेहि मणहारित्तणतो मणहर, गधतो सुरभिगध, सील्वगसडेऽवि जम्हा साधवो णदति प्रमोदन्ति (न्ते) रमन्तीत्यर्थ विविहलद्धिविसेसतो य मणहर सीलवण, विसुद्धभावत्तणतो य सुगध, जहा दव्ववणसड गधेण उद्धुमात ति व्याप्त, तहा सोलगधेण सघस्स गधुद्धुमायस्स । किं च ज पव्वतासण्ण सिलारुक्खगहण त कदर ति, भावेण जीवेसु दयाकरणसुदर ज त कदर ति, तत्थ य उप्पावल्ले दरितो त्ति दप्पितो जीवदयाकरणदप्पितो त्ति वुत्त भवति को य सो सुणिगणो सो चेव सुणिगणो मइदो परप्पवादिसासगसघमयाग इदो, कह ? सितरादउत्तमभावत्तणतो । हेतु त्ति—पक्खधम्मो कारण वा ते सतगसो सुत्ते सभरति, ते य हेतवो धातू, ते ग पगलंति परूवणगुहाए, सा य परूवणगुहा णाणादिरतणादिएहिं दित्ता, खेलोसहिमादिओसहीहिं वा दित्ता, एव दित्तोसहि गुहस्स सघस्स । सवरो त्ति—पच्चक्खाणं, त चेव सलिल किंचि पव्वतगाओ सरित उज्झर, इहावि खाइगभावाता खओवसमिय-उज्झर, ततो पलविता खतोवसमितसवरदगधारा, सच्चेव धारा हारो, तेण विरायते सोभति त्ति । सावगजणो पउरो त्ति—वहुप-

चुरः सो य गीतद्धणीए परवति त्ति रडंती ते चेव मोरा णाडगादीहि य णच्चंति, जं पव्वतस्स अद्धे समप्पदेसं रुक्खाकुलं च तं कुहरं, एव संघपव्वतस्स ण्हवणमडवादी कुहरं ति। विणयकरणत्तातो विणयमतो मुणी, सो य विणयकरणत्तेण फुरते, तं चेव फुरितं विज्जु। ति-चकोरितं, तं च उज्जलं ति-निम्मलं, तेण उज्जलत्तेण संघसिहरं जलितमिव लक्खिज्जति, संघसिहरं च पावपणिपुरिरा दट्ठव्वा । तत्थ य विविहकुलुप्पण्णा साहवो कप्परुक्खा खीरासवादिलद्धिफलेहि य फलभरा लद्धिहेतुट्ठिता साहवो कुसुमिता कुलवण त्ति दट्ठव्वा। मतिसुतादिनाणा वर त्ति पहाणा, ते चेव णाणा वेरुलियादिरतणा इव कंता कंता इति कंतिजुत्ता, कंतिजुत्तणतो चेव सविसतेण जीवादिपदत्थसरूवोवलंभतो दिप्पंति, नाणस्स य मलो णाणावरणं, तण्णिगमातो य विगतमलं, चूलामणिरिव सिहरोवरि चूला सा य णाणातिसयगुणेहिं जुत्तो जुगप्पहाणो पुरिसो चूला इति, एवं संघपव्वतस्स पेढादिचूलपज्जवसाणकप्पियस्स वंदामि विणयपणतो त्ति छह वि गाहाणं एतं कियापदं ति॥१२-१७॥ एवं चरमतित्थगरस्स संघस्स य पणमे कते इमा अवसरप्पत्ता आवली भण्णति, सातिविहा तित्थकरा गणहरा थेरावली य, तत्थ तित्थगरावलि दंसगत्थं इमं भण्णति—

व्याख्या—'सम्मदंसण' गाहा-सम्यग्-अविपरीतं दर्शनं सम्यग्दर्शनं, तदेव प्रथममोक्षाङ्गत्वातसारत्वाद्वज्र सम्यग्दर्शनवज्रं, तदेव दृढं रूढं गाढम् अवगाढं पीठं यस्य सङ्घमहामन्दरगिरेः स सम्यग्दर्शनवज्रदृढरूढगाढावगाढपीठः तस्य वन्दे इति 'द्वितीयार्थे षष्ठी' प्राकृतशैल्याऽऽर्षत्वाच्च तं वन्दे इत्यर्थः, तत्सम्यग्दर्शनवज्रपीठं दृढमिति-निष्प्रकम्पं शङ्कादिशल्यरहितत्वात्, रूढमिति-वृद्धिमुपगतं प्रतिसमयं विशुध्यमानत्वात् प्रशस्ताध्यवसायस्थानेषु वर्तनात्, गाढमिति-निबिडं तीव्रतत्त्वरुचिरूपत्वात् सुष्ठुश्रद्धानरूपत्वा-

दित्यर्थ, जागान्मिति-निमग्न नीवादिपदार्थेषु सम्यगवबोधरूपतया प्रविष्टमित्यर्थ ।'धर्मवरे' त्यादि धारयतीति धर्म, धर्म एव वररत्नमण्डिता प्रधानरत्नमण्डिता चामीकरमेखला यस्य स धर्मवररत्नमण्डितचामीकरमेखलाक', क्रियायोजना पूर्ववदेवावसेया । इह धर्मो द्विविध मूलगुणोत्तरगुणरूप, तत्रोत्तरगुणधर्मा रत्नानि मूलगुणधर्मस्तु चामीकरमेखलेति, तथा च न राजते मूलगुणधर्मचामीकरमेखला उत्तरगुणधर्मरत्नभूषणविकला इति गाथार्थ ॥ १२ ॥ 'नियमूसिय' गाहा-इहोच्छ्रितशब्दस्य व्यवहित प्रयोगो द्रष्टव्य, तत एव भवति-नियम एव कनकशिलातलानि नियमकनकशिलातलानि, तेषु उच्छ्रितानि उज्ज्वलानि ज्वलन्ति चित्ता न्येव माकूटशैलया कूटानि यस्मिन् स तथाविध । इह च नियम इन्द्रियनोइन्द्रियनियम परिगृह्यते, उच्छ्रितानि अशुभाध्यवसायपरित्यागात्, उज्ज्वलानि प्रतिसमय कर्ममलविगमात्, ज्वलन्ति सदा सूत्रानुस्मरणरूपत्वात्, चिन्त्यन्ते यैस्तानि चित्तानि, उक्त च-" चित्तरत्नमसंक्लिष्टमान्तर धनमुच्यते । यस्य तन्मुषित दोषैस्तस्य शिष्टा विपत्तय ॥ १ ॥ इति । वन-वृक्षसमुदाय, नन्दन च तद्वन च नन्दनवन । तत्र नन्दन्ति यत्र सुरसिद्धदैत्यविद्याधरादयस्तत् नन्दन, वनमित्यशोकसहकारादिजाल । मनो हरतीति मनोहर लतावितानविविधपुष्पफलप्रवालाद्युपपेतत्वात् । नन्दनवन च तन्मनोहर चेति "विशेषण विशेष्येण बहुलम्" (पा २-१-५७) इति समास, तस्य सुरभिश्चासौ शीलगन्धश्च सुरभिशीलगन्ध, तेनाध्मात -व्याप्तो य स तथाविधस्तस्य, क्रिया पूर्ववत् । इह च सङ्घमन्दरगिरे सन्तोष एव नन्दनवन, तथाहि-नन्दन्ति तत्र साधव इति, तदेव विविधामर्षौषध्यादिलब्ध्युपपेतत्वान्मनोहर, तस्य सुरभिशीलगन्ध एवेति, अथवा मनोहरस्य सुरभिशीलगन्धविशेषणम्, इति गाथार्थ ॥ १३ ॥ 'जीवदया' गाहा-जीवदयैव सुन्दराणि स्वपरनिर्वृतिहेतुत्वात् कन्दराणि वस्तुतस्तपस्विनिलयत्वात्, तथाहि-अहिंसाव्यवस्थित तपस्वीति

मुनिवरा एव शाक्यादिमृगपराजयान्मृगेन्द्रा मुनिवरमृगेन्द्राः, उत् प्राबल्येन दर्पिता उद्दर्पिताः कर्मशत्रुजयं प्रति, उद्दर्पिताश्च ते मुनिवरमृगेन्द्राश्चेति विशेषणसमासः, जीवदयासुन्दरकन्दरेषु उद्दर्पितमुनिवरमृगेन्द्राः तैः आकीर्णो-व्याप्तो यस्तस्येति । हेतुशते-त्यादि, प्रगलन्ति च तानि रत्नानि च प्रगलद्रत्नानि निस्यन्दवन्ति चन्द्रकान्तादीनि परिगृह्यन्ते धातवः कनकादिधातवो गृह्यन्ते, धातवश्च प्रगलद्रत्नानि च धातुप्रगलद्रत्नानि, दीप्ताश्च ता ओषधयश्च दीप्तौषधयः, धातुप्रगलद्रत्नानि च दीप्तौषधयश्च ता गुहासु यस्य तथोच्यते । इह च सङ्घमन्दरगिरौ हेतुशतान्येव धातवः, अन्वयव्यतिरेकलक्षणाश्च हेतवो गृह्यन्ते, प्रगलद्रत्नानि तु क्षायोप-शमिकभावनिस्यन्दवन्ति श्रुतरत्नानि गृह्यन्ते, दीप्तौषधयस्तु विशुद्धा आमर्षौषध्यादयो गृह्यन्ते, गुहास्तु समवायाः प्ररूपणगुहा वा गृह्यन्ते इति गाथार्थः ॥ १४ ॥ 'संवर' गाहा-संवरश्चासौ वरश्च संवरवरः, संवरः-प्रत्याख्यानरूपः सर्वप्राणातिपातादिविनि-वृत्तिरूपत्वाद्वरः, असावेव कर्ममलक्षालनाज्जलमिव जलं संवरवरजलं, तस्मात्प्रगलितं च तदोज्झरं च संवरवरजलप्रगलितोज्झरं, तथा च संवरवरजलादुपचारतः प्रगलितश्रुतज्ञानादोज्झरमिति, तदेव प्रविराजमानो हारो यस्य स तथाविधः । श्रावकजनेत्यादि, रवन्तश्च ते मयूराश्च रवन्मयूराः, प्रचुराश्च ते रवन्मयूराश्च प्रचुररवन्मयूराः, श्रावका एव जनास्त एव प्रचुररवन्मयूराः, तैर्नृत्य-न्तीव कुहराणि यस्येति समासः । इह च स्तुतिस्तोत्रगन्धर्वादिरवणं कुहराणि शास्त्रमण्डपादीनि (इति) गाथार्थः ॥१५॥ 'विणय' गाहा-स्फुरन्त्यश्च ता विद्युतश्च स्फुरद्विद्युतः, विनयेन नता विनयनताः, विनयनताश्च ते प्रवरमुनिवराश्चेति, त एव स्फुरद्विद्युतः (ताभिः) ज्वलन्ति शिखराणि यस्येति समासः । इह च विनयस्यान्तरतपोभेदत्वात्तपांस्येव स्फुरन्ति, प्रावचनिकाश्च विशिष्टा-चार्यादयः शिखराणि । विविहगुणेत्यादि, विविधा गुणा येषां ते विविधगुणाः विशेषणान्यथानुपपत्त्या साधवो गृह्यन्ते, त एव

विशिष्टकुलोत्पन्नत्वात्सत्त्वसुखहेतुधर्मफलप्रदानाच्च कल्पवृक्षकाः विविधगुणकल्पवृक्षकाः फलभरश्च कुसुमानि च (फलभरकुसुमानि) विविधगुणकल्पवृक्षकाणां फलभरकुसुमानि, तैराकुलानि वनानि यस्येति समासः । इह च फलभरो धर्मफलभरो गृह्यते, कुसुमानि -ऋद्धयः वनानि-गच्छा इति भावार्थः ॥२६॥ 'णाण' गाहा-ज्ञानं च तद्वरं च ज्ञानवरं परमनिर्वृत्तिहेतुत्वात्, तदेव रत्नं, दीप्य-माना कान्ता विमला वैडूर्यचूडा यस्य स तथाविधः । अत्र दीप्तेति यथावस्थितजीवादिपदार्थस्वरूपोपलम्भात्, कान्ता भव्यजन मनोहारित्वात्, विमला तदावरणाभावात् 'वन्दे' त्ति विनयप्रणतः सङ्घमहामन्दरगिरेर्माहात्म्यमिति (अध्याहार्यम्), कर्मणि वा षष्ठी इति गाथार्थः ॥२७॥ एवं सङ्घनमस्कारा अपि प्रतिपादिताः साम्प्रतमावलिका प्रतिपाद्यते, सा च त्रिविधा-तीर्थकरावलिका गणधरावलिका स्थविरावलिका च । तत्र तीर्थकरावलिकां प्रतिपादयन्नाह—

[ँवंदे]उसभं अजियं संभवमभिनंदण सुमइसुप्पभ सुपासं। ससि पुप्फदंत सीयल-सिज्जंसं वासुपुज्जं च॥१८॥
विमलमणंतय धम्मं, संतिं कुंथुं अरं च मल्लिं च। मुणिसुव्वय नमि नेमिं, पासं तह वद्धमाणं च ॥ १९॥

चूर्णिः—' वंदे उसभ ' गाहा ' विमल ' गाहा य)-कंठा ॥ १८-१९ चरमतित्थगरस्स इमा गणहरावली—

व्याख्या—' वंदे ' गाहा ' विमल ' गाहा-गाथाद्वयमपि निगदसिद्धम् ॥ १८-१९ ॥

गणधरावलिका तु या यस्य तीर्थकृत' सा प्रथमानुयोगानुसारेण द्रष्टव्येति, महावीरवर्धमानस्य पुनरियम्—

---

१ वं१' इति चतसृषु चूर्णिप्रतिषु चतसृषु वृत्तिप्रतिषु च दृश्यते, समित्या मुद्रापित प्रतौ च नास्ति,

पढमित्थ इंदभूई, बीए पुण होइ अग्गिभूइ त्ति । तइए य वाउभूई, तओ वियत्ते सुहम्मे य ॥२०॥
मंडियमोरियपुत्ते, अकंपिए चेव अयलभाया य । मेअज्जे य पहासे य, गणहरा हुंति वीरस्स ॥ २१ ॥

चूर्णिः—कंठा ॥ २०-२१ ॥

व्याख्या—पढ० मंडिय० एतदपि गाथाद्वयं निगदसिद्धम् ॥ २०-२१ ॥

साम्प्रतं वर्तमानतीर्थाधिपतेः स्थविरावलिकां प्रतिपादयन्नतिशयभक्त्या सामान्यतस्तच्छासनस्तवं प्रतिपादयन्नाह—

निव्वुइपहसासणयं, जयइ सया सव्वभावदेसणयं । कुसमयमयनासणयं, जिणिंदवरवीरसासणयं ॥२२॥

व्याख्या—'निव्वुइपह' रूपकम्-निर्वृत्तिपथशासनकमिति, अत्र यद्यपि 'सम्यग्दर्शनज्ञानचारित्राणि निर्वाणमार्गः' तथापि अनेन दर्शनचरणपरिग्रहः, यत आह-जयति सदा सर्वभावदेशनकं—सर्वभावप्ररूपकमित्यर्थः, अनेन तु ज्ञानपरिग्रहः । अथवा निर्वृत्तिपथशासनकमित्यनेन संपूर्णनिर्वाणमार्गकथनमेवेति गृह्यते, जयति सदा सर्वभावदेशनकमित्यनेन तु विधिप्रतिषेधद्वारेण न निर्वृतिमार्गव्यतिरेकेण किञ्चिदस्तीति ख्याप्यते । यत एवं भूतमत एव कुसमयमदनाशनकं कुसिद्धान्तावलेपनाशनकमित्यर्थः । जिनेन्द्रवरवीरशासनकं चरमतीर्थंकरप्रवचनमिति हृदयम् । इति रूपकार्थः ॥ २२ ॥ अधुना [1]यैरविच्छेदेन स्थविरैः क्रमेणैदंयुगीनानामानीतं तदावलिकां प्रतिपादयन्नाह—

---

१ 'यैरिदमषि०' इति प्र०

सुहम्मं अग्गिवेसाणं, जंबूनाम च कासवं। पभवं कच्चायणं वंदे, वच्छं सिज्जंभवं तहा ॥ २३ ॥

चूर्णि —एत्थ गणहरावलीतो सुधम्मातो थेरावली पवत्ता, जतो भण्णति–' सुहम्म ' गाहा–समणस्स णं महावीरस्स कासवगोत्तस्स सुहम्मे अतेवासी अग्गिवेसायणसगोत्ते, सुहम्मस्स अतेवासी जबूनामे कासवगोत्तेण, जंबूणामस्स अतेवासी पभवे कच्चायणसगोत्ते, पभवस्स अतेवासी सेज्जंभवे वच्छसगोत्ते ॥ २३ ॥

व्याख्या—' सुहम्म ' गाहा–इह स्थविरावलिका सुधर्मस्वामित प्रवृत्ता, उक्तं च–" तित्थं च सुहम्माओ णिरवच्चा गणहरा सेसा " त्ति । अतस्तमेव पुरस्कृत्येदं प्रतिपाद्यते सुधर्मं भगवद्गणधरम् अग्निवैशायनमिति–अग्निवैशायनसगोत्रं, तथा तच्छिष्यं जम्बूनामानं च काश्यपगोत्रं, तस्मात्प्रभवं–तच्छिष्यं प्रभवनामानं कात्यायनमिति–कात्यायनसगोत्रं, वन्दे इति क्रिया प्रत्येकमभिसम्बध्यते, तथा तच्छिष्यं वच्छमिति–वत्ससगोत्रं शय्यम्भवं तथा । इति गाथार्थः ॥ २३ ॥

जसभद्दं तुंगियं वंदे, संभूयं चेव माढरं । भद्दबाहुं च पाइन्नं, थूलभद्दं च गोयमं ॥ २४ ॥

चूर्णिः—' जसभद्द ' गाहा–सेज्जंभवस्स अतेवासी जसभद्दे तुंगियायणे वग्घावच्चसगोत्ते, जसभद्दस्स अतेवासी इमे दो थेरा–भद्दबाहू पायीणग्गिसगोत्ते, संभूतविजए य माढरसगोत्ते, संभूतविजयस्स अतेवासी थूलभद्दे गोतमसगोत्ते ॥ २४ ॥

व्याख्या—' जसभद्द ' गाहा–शय्यम्भवशिष्यं यशोभद्रं तुङ्गिकमिति–तुङ्गिकगणं व्याघ्रापत्यसगोत्रं वन्दे । अस्य च द्वौ प्रधानशिष्यौ बभूवतुः, तद्यथा–सम्भूतविजयो माढरसगोत्रः, भद्रबाहुः प्राचीनसगोत्र इति । तथा चाह–" सम्भूत चेव माढर

भद्रबाहुं प्राचीनम्" इति। तत्र सम्भूतस्य विनेयः स्थूलभद्रो गौतमसगोत्र आसीत्, आह च-"स्थूलभद्रं च गौतमम्" इति गाथार्थः ॥ २४ ॥

एलावच्चसगोत्तं, वंदामि महागिरिं सुहत्थिं च। तत्तो कोसियगोत्तं, बहुलस्स सरिव्वयं वंदे ॥२५॥

चूर्णिः—'एलावच्च' गाहा-थूलभद्दस्स अंतेवासी इमे दो थेरा-महागिरी एलावच्चसगोत्ते, सुहत्थी य वासिट्ठसगोत्ते। सुहत्थिस्स सुट्ठितसुपडिबुद्धादयो आवली ते जहा दसासु तहा भाणितव्वा, इहं तेहिं अहिगारो णत्थि। महागिरिस्स अंतेवासी बहुलो बलिस्सहो य दो जमलभातरो कोसियगोत्ता, तत्थ बलिस्सहो पावयणी जातो, तस्स थुतिकरणे भणंति 'बहुलस्स सरिव्वयं वंदे' सरिव्वयं ति सरीसव्वयो, वयो य जम्मकालं पडुच्च जा जा सरीरपरिवड्ढियवच्छा सा सा च तो भण्णति ॥ २५ ॥

व्याख्या-'एलावच्च' गाहा-स्थूलभद्रस्यापि द्वावेव प्रधानशिष्यौ, तद्यथा-एलापत्यसगोत्रो महागिरिः, वसिष्ठसगोत्रः सुहस्ती च, यत आह-" एलापत्यसगोत्रं वन्दे महागिरिं सुहस्तिनं च"। तत्र सुहस्तिनः सुस्थितसुप्रतिबुद्धादिक्रमेणावलिका यथा दशासु तथैव द्रष्टव्या, न तयेहाधिकारः महागिर्यावलिकयेहाधिकारः, तत्र महागिरेः बहुलबलिस्सहौ कौशिकसगोत्रौ यमलभ्रातरौ द्वौ प्रधानशिष्यौ बभूवतुः। तयोरपि बलिस्सहः प्रावचनीय आसीत्, अत आह-ततः कौशिकगोत्रं बहुलस्य सदृशवयस यमलत्वात् वन्दे। इति गाथार्थः ॥ २५ ॥

हारियगुत्तं साइं च वंदिमो हारियं च सामज्जं। वंदे कोसियगोत्तं संडिल्लं अज्जजीयधरं ॥ २६ ॥

चूर्णि —'हारिय' गाहा–वलिस्सहस्स अंतेवासी साती हारियसगोत्तो। सातिस्स अंतेवासी सामज्जो हारितसगोत्तो चेव। सामज्जस्स अंतेवासी सडिल्लो कोसियसगोत्तो, सो य अज्जजीतधरोत्ति, 'अज्ज' ति आर्यमार्ग वा, 'जीत' ति सुत्त धरति सुत्तत्थस्स अविच्चुतिधरणत्तातो, 'वंदे' ति वक्कसेस। पाढतर वा 'जीवधर' ति आर्यत्वाज्जीत्र धरेति रक्षतीत्यर्थ। अण्णे पुण भणति–सडिल्लस्स अंतेवासी जीव (त) धरो अणगारो, सो य अज्जसगोत्तो त्ति ॥ २६ ॥

व्याख्या–'हारिय' गाहा–बलिस्सहशिष्य हारीतसगोत्र स्वातिं च वन्दे। तथा स्वातिशिष्य हारीत च हारीतसगोत्रमेव। श्यामार्यं (श्यामार्य) शिष्य वन्दे कौशिकसगोत्र शाण्डिल्य किम्भूत? आर्यजीतधरम्–आराधात सर्वहेयधर्मभ्य इत्यार्य, जीतमिति सूत्र, जीत मर्यादा व्यवस्था स्थिति कल्प इति पर्याया, मर्यादादिकारण च सूत्रमिति भावनीय, धारयतीति धर, आर्यजीतस्य धर आर्यजीतधर तम्। अन्ये तु व्याचक्षते–किल शाण्डिल्यशिष्य आर्यसगोत्रो जीतधरनामा सूरिरासीव। इति गाथार्थ ॥ २६ ॥

तिसमुद्दखायकित्ति, दीवसमुद्देसु गहियपेयाल। वंदे अज्जसमुद, अक्खुभियसमुद्दगभीर॥ २७ ॥

चूर्णि—'तिसमुद्द' गाहा–सडिल्लस्स सीसो पुव्वदक्खिणापरा ततो समुद्दा, उत्तरतो वेयड्ढो, एततरे खातकित्ती। सेस कठ ॥ २७ ॥ तस्स सीसो इमो—

व्याख्या—'तिसमुद्द' गाहा–शाण्डिल्यशिष्य वन्दे आर्यसमुद्रमिति क्रिया। किम्भूत? त्रिसमुद्रख्यातकीर्तिं पूर्वदक्षिणापरा स्त्रय समुद्रा उत्तरतस्तु हिमवान् वैताढ्यो वा इति, अत्रान्तरे प्रथितकीर्तिमित्यर्थ, द्वीपसमुद्रेषु गृहीतप्रमाणम् अतिशयेन द्वीपसागरप्रज्ञप्तिविज्ञायकमिति भाव अक्षुभितसमुद्रवत् गम्भीर, अतस्तम्, इति गाथार्थ ॥ २७ ॥

भणगं करगं झरगं, पभावगं णाणदंसणगुणाणं । वंदामि अज्जमंगुं, सुयसागरपारगं धीरं ॥२८॥

चूर्णिः—'भणगं' गाहा—कालियपुव्वसुत्तत्थं भणतीति भणको, चरणकरणक्रियां करोतीति कारकः, सुत्तत्थे य मणसा झायंतो झरको, परप्पवादिजयेण पवयणप्पभावको, नाणदंसणचरणगुणाणं च पभावको आधारो य, सेस कंठं ॥२८॥ तस्स सीसो इमो—

व्याख्या—'भणगं' गाहा—आर्यसमुद्रशिष्यं वन्दे आर्यमङ्गुमिति योगः । किम्भूतं ? भणकं—कालिकादिसूत्रार्थं भणतीति भणः, स एव प्राकृतशैल्या भणकस्तं, कारकं—कालिकादिसूत्रोक्तमेवोपधिप्रत्युपेक्षणादिक्रियाकलापं करोतीति कारकस्तं, ध्यातारं धर्मध्यानं ध्यायतीति ध्याता तम् । इहौघतः कारकमित्युक्ते प्रधानपरलोकाङ्गतारव्यापनार्थं ध्यानस्य ध्यातारमिति विशेषाभिधानम् । यत इत्थम्भूतोऽत आह—प्रभावकं ज्ञानदर्शनगुणानां यथावस्थितपदार्थावबोधादीनाम्, एकग्रहणात्तज्जातीयग्रहणाच्चरणपरिग्रहः । श्रुतसागरपारगं धीरम् इति गाथार्थः ॥ २८ ॥

नाणम्मि दंसणम्मि अ, तवविणए णिच्चकालमुज्जुत्तं । अज्जं नंदिलखमणं, सिरसा वंदे पसन्नमणं ॥२९॥

चूर्णिः—'नाणम्मि' गाहा—कंठा ॥ २९ ॥ तस्स सीसो—

व्याख्या—'नाणम्मि' गाहा—आर्यमङ्गुशिष्यम् आर्यनन्दिलक्षपणं शिरसा वन्दे प्रसन्नमनसं किम्भूतं ? ज्ञाने दर्शने च तपसि विनये च अनेन चरणमाह, नित्यकालमुद्युक्तम्—अप्रमादिनम् इति गाथार्थः ॥ २९ ॥

वड्ढउ वायगवंसो, जसवंसो अज्जनागहत्थीणं । वागरणकरणभंगिय—कम्मपयडीपहाणाणं ॥३०॥

वायगवसो–वाएति सिस्साण कालियपुव्वसुत्त ति वायगा–आचार्या इत्यर्थः,

चूर्णि —'वड्ढउ' त्ति वृद्धिं यातु; को य सो ? वायगवसो–वाएति सिस्साण कालियपुव्वसुत्त ति वायगा–आचार्या इत्यर्थः, सो चेव जसोवज्ज

गुरुसण्णिहाणे वा सिस्सभावेण वाइत सुत जेहिं ते वायगा, 'वसो' त्ति पुरिसपव्वपरपरेण ठितो भण्णति, अज्जनागहत्थीण ति

णत्ता मज्जमोरज्जगतो वा जसवसा भण्णति, सो य अगागतवसो इत्यर्थ , कस्स सो एरिसो वसो भण्णत्ति ? चरणकरणे कालकरणेसु वा

करिसाण नागहत्थीगति पुच्छा भण्णति–जीवादिपदत्थपुच्छासु वाकरण सद्दपाहुडे वा पहाणाण; एव चरणकरणे कालकरणेसु वा

सव्वभगनिरूपणासु य तप्परूवणे य तहा कम्मप्पगडिपरूवणाए पधाणाण पुरिसाण वड्ढतु वायगवसो ॥ ३० ॥ तस्स सीसो—

व्याख्या—'वड्ढउ' गाहा–वर्धता–वृद्धिमुपयातु, कोऽसौ ? वाचकवश', तत्र विनेयेभ्य पूर्वगत सूत्रमन्यच्च वाचयन्तीति

वाचका , तेषा वश –भाविपुरुषपर्वप्रवाह । किंभूत वाचकवश ? यशोवश , अनेन विपक्ष व्यवच्छेदमाह, तथाहि अलमयश प्रधानस्य

ससारहेतो परममुनिविधृतलिङ्गविडम्बकस्य वृद्ध्येति । केषा सम्बन्धी सम्भूत ? आर्यनन्दिलक्षपणशिष्याणामार्यनागहस्तिनाम् ।

किम्भूताना ? व्याकरणकरणभङ्गिककर्मप्रकृतिप्रधानाना, तत्र व्याकरण–प्रश्नव्याकरण शब्दप्राभृत वा, करण–पिण्डविशुद्ध्यादि

" पिंडविसोही समिती भावण पडिमा य इंदियनिरोहो । पडिलेहण गुत्तीओ अभिग्गहा चेव करण तु ॥ १ ॥ " भङ्गिका –

चतुर्भङ्गिकाया तदुक्त वा, कर्मप्रकृति•–प्रतीता, एतेषु प्ररूपणामधिकृत्य प्रधानानाम्, इति गाथार्थ' ॥ ३० ॥

जच्चजणधाउसमप्पहाण, मुद्दियकुवलयनिहाण । वड्ढउ वायगवसो, रेवइनक्खत्तनामाण ॥ ३१ ॥

चूर्णि —'जच्चजण' गाहा–जच्चजणगहण कित्तिमवुदासत्थ सरीरवण्णेण तन्निभो, तहा सरसपक्कमुद्दियफलमणिभो य, कुच्छितो

उवलो कुवलयो, सो य कण्हकायो, कुवलय वा लीलुप्पलं, कुवलयं वा रयणविसेसो, रेवतिवायगो त्ति । सेस कठ ॥३१॥ तस्स सोसो—

व्याख्या—'जच्चंजण' गाहा–जात्यश्चासावञ्जनधातुश्चेति समासः, तत्समा प्रभा–देहच्छाया येषां ते तथाविधास्तेषाम्। मा भूदत्यन्तकृष्णसम्प्रत्यय इत्यत आह–मुद्रिकाकुवलयनिभानां–पक्वसरसद्राक्षानीलोत्पलनिभानामित्यर्थः, रत्नविशेषः कुवलयमित्यन्ये तथाप्यविरोधः। वर्धतां वाचकवंशः। केषाम्? आर्यनागहस्तिशिष्याणां रेवतिनक्षत्रनाम्नां–रेवतिवाचकानाम्, इति गाथार्थः॥३१॥

अयलपुरा णिक्खंते, कालियसुयआणुओगिए धीरे। बंभदीवगसीहे, वायगपयमुत्तमं पत्ते॥ ३२॥

चूर्णिः—'अयलपुरा' गाहा बंभद्दीवगसीहाणं आयरियाण समीवे निक्खंतो सीहवायको उत्तमवायकत्तणं च तक्कालसुत संभवं पडुच्च, सेसं कठं॥ ३२॥ तस्स सीसो—

व्याख्या—'अयलपुरा' गाहा–अचलपुरात् निष्क्रान्तान् कालिकश्रुतानुयोगेन नियुक्ताः कालिकश्रुतानुयोगिकाः यद्वा कालिकश्रुतानुयोग एषां विद्यत इति समासः तान् कालिकश्रुतानुयोगिनः, धीरान्–स्थिरान्, ब्रह्मदीपिकान् सिंघा(हा)न्–ब्रह्मदीपिकशाखोपलक्षितान् सिंघा(हा)चार्यान् रेवतिवाचकशिष्यान्, वाचकपदं तत्कालापेक्षया उत्तम प्राप्तान् इति गाथार्थः॥३२॥

जेसि इमो अणुओगो, पयरइ अज्जावि अड्ढभरहम्मि। बहु नयरनिग्गयजसे, ते वंदे खंदिलायरिए॥३३॥

चूर्णिः—'जेसि इमो' गाहा–कहं पुण तेहिं अणुओगो? उच्यते–बारससंवच्छरिए दुभिक्खकाले भत्तट्ठा अण्णण्णतो फिडिताणं गहणगुणणणुप्पेहाभावतो सुते विप्पणट्ठे पुणो सुभिक्खकाले जाते मधुराए महंते साहुसमुदए खंदिलायरियप्पमुह-संघेण जो जं संभरति त्ति एवं संघडियं कालियसुतं, जम्हा य एतं मधुराए कतं तम्हा माथुरा वायणा भण्णति, सा य खंदि-

लायरियसमय त्ति काउ तस्सतिओ अणुओगो भण्णति। सेस कठ। अण्णे भणति, जहा–सुत ण णट्ठ, तम्मि दुभिक्खकाले जे अण्णे पहाणा अणुओगधरा ते विणट्ठा, एगे खदिलायरिए सठिरे, तेण महुराए अणुयोगो पुणो साधूण पवत्तितो त्ति माथुरा वायणा भण्णति, तस्सतितो य अणुयोगो भण्णति ॥ ३३ ॥

व्याख्या—'जेसि' गाहा-येपाम् अयम् अनुयोग प्रचरति अद्यापि अर्धभरते वैताढ्यादारत बहुनगरेषु निर्गत–प्रसिद्ध यशो येषा ते बहुनगरनिर्गतयशस तान् वन्दे सिंहवाचकशिष्यान् स्कन्दिलाचार्यान्। कह पुण तेसि अणुओगो ? उच्यते–वारससवच्छरिए महते दुभिक्खे काले भत्तट्ठा फिडियाण गहणगुणणणुप्पेहाभावतो सुत्ते विप्पणट्ठे पुणो सुभिक्खे काले जाते महुराए महते समुदए खदिलायरियप्पमुहसघेण जो ज सभरइ त्ति एवं सघडित कालिय सुय, जम्हा एय महुराते कय तम्हा माहुरा वायणा भण्णति, सा य खदिलायरियसमत त्ति काउ तस्सतिओ अणुओगो भण्णति। अन्ने भणति, जहा-सुय णो णट्ठ, तम्मि दुभिक्खकाले जे अन्ने प्पहाणा अणुओगधरा ते विणट्ठा, एगे खदिलायरिए सठिरे, तेण महुराए पुणो अणुओगो पवत्तिओ त्ति माहुरा वायणा भन्नइ, तस्सतिआ अणुओगो भन्नइ। इति गाथार्थ ॥ ३३ ॥

तत्तो हिमवतमहत–विक्कमे धिइपरक्कममणते। सज्झायमण धरं, हिमवते वदिमो सिरसा ॥ ३४ ॥

चूर्णि —'तत्तो हिम' गाहा हिमवतपव्वतेण महतत्तण तुल्ल जस्स सो हिमवतमहतो, इह भरहे णत्थि अण्णो तत्तुल्लो त्ति, एस थुतिवादो, उत्तरतो वा हिमवतेण सेसदिसासु य समुद्देण निवारितो जसो हिमवत निवारणो जसो महतो त्ति अतो हिमवतमहतो महतविक्कमो, कह ? उच्यते–सामत्थतो महते वि कुलगणसघप्पयोयणे तरति त्ति, परप्पवादिजयेण वा विसेसलद्धिस-

पण्णत्तणतो वा महंतविक्कमो। अहवा परीसहोवसग्गे तवविसेसे वा धितिबलेण परिक्कमंतो महंतो अणंतगमपज्जवत्तणतो अणंतधरो तं महंतं हिमवंतणामं वंद। सेसं कंठं ॥ ३४ ॥ किंच

व्याख्या—'ततो' गाहा-ततः-स्कन्दिलाचार्यशिष्यं हिमवंतं वन्दे शिरसेति क्रिया। किम्भूतं? हिमवन्महाविक्रमं हिमवत इव महाविक्रमो विहारव्याख्यादिलक्षणो यस्य स तथाविधस्तं। 'धिइपरक्कममणंते त्ति' अनन्तधृतिपराक्रमं, प्राकृतशैलया तु अन्यथोपन्यासः, अनन्तः धृतिप्रधानः पराक्रमः-कर्मशत्रुजयो यस्य स तथाविधस्तं। 'सज्झायमणंतधरं' ति अनन्तस्वाध्यायधरं धरतीति धरः, अनन्तगमपर्यायत्वादनन्तं सूत्रं, तद्विषयः स्वाध्यायस्तस्य धर इति समासः तम्। इति गाथार्थः॥ ३४ ॥

कालियसुयअणुओगस्स, धारए धारए य पुव्वाणं। हिमवंत खमासमणे, वंदे णागज्जुणायरिए ॥ ३५ ॥

चूर्णिः—'कालिय' गाहा-हिमवंतो चेव हिमवंतखमासमणो तस्स सीसो णागज्जुणायरितो ॥ ३५ ॥ तस्स इमा गुणकित्तणा-

व्याख्या—'कालिय' गाहा-कालिकश्रुतानुयोगस्य धारकान् धारकाँश्च पूर्वाणामुत्पादादीनां हिमवत्क्षमाश्रमणान् वन्दे, तथैतच्छिष्यानेव वन्दे नागार्जुनाचार्यान् इति गाथार्थः ॥ ३५ ॥ किम्भूतान्?

मिउमद्दवसंपन्ने, आणुपुव्विवायगत्तणं पत्ते। ओहसुयसमायारे, नागज्जुणवायए वंदे ॥ ३६ ॥

चूर्णिः—'मिउमद्दव' गाहा-आणुपुव्वी सामादिणादिसुतग्गहणेण कालतो य पुरिमपरियायत्तणेण पुरिसाणुपुव्वितो य वायगत्तणं पत्तो ओहसुतं च उसग्गो त च आयरति। सेस कंठं॥ ३६ ॥ णागज्जुणवायगस्स सीसो भूतदिण्णो आयरितो, तस्सिमा गुणकित्तणा तिहिं गाहाहिं—

व्याख्या—'मिउ' गाहा—मृदुमार्दवसम्पन्नान् उपलक्षणत्वात् मृदुत्वस्य कान्? क्षमामार्दवार्जवसन्तोषसम्पन्नानित्यर्थः । आनुपूर्व्या—वयःपर्यायकालगोचरया वाचकत्वं प्राप्तान्, ऐदंयुगीनानामपि सामाचारीप्रदर्शनपरमेतत्, न चायुक्तं द्वितीयपदमाश्रित्यैदंयुगीनानामपि युज्यते कादाचित्कानुपूर्वीं विहाय क्वचिदप्याचार्यत्वाद्यारोपणं, महापुरुषाणां गौतमादीनामाख्यातनामसद्भाव कृत प्रसङ्गेन प्रसार एव दण्डो भगवदानावितथकारिणामिति । 'ओघश्रुतसमाचरकान्' ओघश्रुतम्—उत्सर्गश्रुतं तत् समाचरन्ति ये ते तथाविधास्तान् नागार्जुनवाचकान् वन्दे इति गाथार्थः ॥ ३६ ॥

वरकणगतवियचंपग-विमउलवरकमलगब्भसरिवन्ने । भवियजणहिययदइए, दयागुणविसारए धीरे ॥३७॥
अड्ढभरहप्पहाणे, बहुविहसज्झायसुमुणियपहाणे । अणुओगियवरवसभे, नाइलकुलवंसनंदिकरे ॥३८॥
भूयहियअप्पगब्भे, वंदेऽहं भूयदिन्नमायरिए । भवभयवुच्छेयकरे, सीसे नागज्जुणरिसीणं ॥ ३९ ॥

चूर्णि—'वरकणगतविय' गाहा, गब्भो त्ति पोमकेसरा, सेसं कंठं ॥ ३७ ॥ 'अड्ढभरह' गाहा—बहुविहो सज्झायो त्ति अंगपविट्ठो बारसविधो अणंगपविट्ठो य कालियउक्कालितो अणेगविधो, सो य पधाणो त्ति सुमुणितत्तणेण निस्संको त्ति काउं, सेसं कंठं ॥ ३८ ॥ 'भूयहिय' गाहा—भूतहित त्ति अहिंसा, पगब्भ त्ति [1]धारिज्ज, अहिंसाभावे पागब्भता अतीव अप्पणो तताए अहिंसाभावपरिणते इत्यर्थः । सेसं कंठं ॥ ३९ ॥ भूतदिण्णस्स सीसो लोहिच्चो, तस्स इमा थुती—

१ धारेज्ज' प्र०

व्याख्या—'वरकणग' गाथा 'अड्ड' गाथा 'भूयहिय' गाथा–इदं गाथात्रयमपि प्रायो निगदसिद्धमेव, नवरं भव्यजन-
हृदयदयितान्–भव्यजनहृदयवल्लभान् । तथा सुविज्ञातबहुविधस्वाध्यायप्रधानान् बहुविध आचारादिभेदात् स्वाध्यायः । अनु-
योजिता यथोचिते वैयावृत्त्यादौ वरवृषभाः–सुसाधवो यैस्तान् । नागेन्द्रकुलवंशनन्दिकरानिति प्रमोदकरानित्यर्थः । भूतहितप-
गल्भान्–अनेकधा सत्त्वहितनिपुणानिति भावः । वन्देऽहं भूतदिन्नाचार्यानिति, अत्रानुस्वारो (मकारो) ऽलाक्षणिकः । भवभय-
व्यवच्छेदकरान्–सदुपदेशादिना संसारभयव्यवच्छेदकरणशीलान् । (इति गाथात्रयार्थः) ॥ ३७–३८–३९ ॥

सुमुणियनिच्चानिच्चं, सुमुणियसुत्तत्थधारयं वंदे । सब्भावुब्भावणया,तत्थं लोहिच्चणामाणं ॥ ४० ॥

चूर्णिः—'सुमुणिय' गाहा–सुट्ठुमुणित सुमुणितं किं तं ? भण्णति–जीवो जीवत्तणेण निच्चो, गतिमादिएहिं अणिच्चो, पर-
माणू अजीवत्तणेण मुत्तत्तेण य निच्चो, दुप्पदेसादिएहिं वण्णादिपज्जवेहि य अणिच्चो । सुट्ठु य मुणितं सुत्तत्थ धरेति । णिच्चकालं
पि स्वे भावे ठितो सब्भावो सो सोभणो वा भावो सब्भावो स विज्जमाणो वा भावो सब्भावो तं उब्भासए तच्चत्तेण–तथ्यत्वे-
नेत्यर्थः, तं च लोहिच्चणामं आयरियं वंदे । सेस कंठं ॥ ४० ॥ तस्स लोहिच्चस्स सीसो दूसगणी, तस्स इमा थुती—

व्याख्या—'सुमुणि' गाहा–भूतदिन्नाचार्यशिष्यं वन्देऽहं लोहित्यमिति क्रिया । किम्भूतं सुष्ठु विज्ञातं नित्यानित्यं येन स
तथाविधस्तं, किं विज्ञातं ? विशेषणान्यथानुपपत्तेर्वस्त्विति गम्यते, यथा सवत्सा धेनुरित्युक्ते गौर्वडवाया विशेषणायोगात् इति ।
तच्च वस्तु सचेतनाचेतन, तत्र सचेतनमात्मा चेतनत्वाद्यपेक्षया नित्यो, नारकतिर्यग्नरामरपर्यायापेक्षया चानित्यः, एवमचेतनम-
प्यण्वादि विज्ञातव्यं, तथाहि–परमाणुरजीवत्वमूर्तत्वादिभिर्नित्यः, वर्णादिभिर्द्व्यणुकादिभिस्त्वनित्यः इति, उक्तं च–"सर्वव्यक्ति-

पु नियत, क्षणे क्षणेऽन्यत्वमथ च न विशेष' ॥ सत्योश्चित्यपचित्योराकृतिजातिव्यवस्थानात् ॥ १ ॥ " इति । अत्र बहु वक्तव्य, तत्र नोच्यते, ग्रन्थविस्तरभयात्, गमनिकामात्रप्रधानोऽयमारम्भ इति । अनेन न्यायवेदित्वमाह । सुविज्ञातसूत्रार्थधारकमिति अनेन त्वोघत एव स्वभ्यस्तसूत्रार्थधारकमिति । सद्भावोद्भावना तथ्यमित्यनेन सम्यक्प्ररूपकत्वमाह । इति गाथार्थ ॥ ४० ॥

अत्थमहत्थक्खाणिं, सुसमणवक्खाणकहणनिव्वाणिं । पयईइ महुरवाणिं, पयओ पणमामि दूसगणिं ॥४१॥

चूर्णि —' अत्थमहत्थ ' गाहा–खाणि त्ति आगरो, सा य अत्थस्स खाणि, किं विसिट्ठस्स ? महत्थस्स, महत्थो य अणेगपज्जायभेदभिण्णो, अहवा भासगरूवो अत्थो विभासगसव्वपज्जवत्तीकरो य महत्थो, एरिसस्स अत्थस्स खाणी, का सा वाणि त्ति सवज्झति सुभो समण सुस्समण तस्स सुस्समणस्स वक्खाण ति अत्थकहण, तम्मि अत्थकहणे सोताराण करेति वाणी णेव्वाणिं । अहवा वक्खाण ति अणुयोगपरूवण, कहण ति अक्खेवमादियाहिं कहाहिं धम्मकहण, तत्थ कुद्धाण वि आगताण तस्स वाणी णेव्वाणिं जणेति, किमग पुण धम्मस्सवणमागताण ? अहवा पाठो सुसवण ति, तत्थ सवण त्ति कण्णा, तेसु सुह जणेइ त्ति सुस्सवणा, एव इकारलोवातो भण्णति । अहवा सुस्सवणा सुहस्सवा इत्यर्थ । सेस कठ ॥ ४१ ॥ इमा वि दुस्सगणिणो चेव चरणथुती—

व्याख्या—' अत्थ ' गाहा–लोहित्यशिष्य प्रयत सन् अनुत्सृष्टप्रयत्नपर सन्नित्यर्थ , प्रणमामि दुष्यगणिनमिति क्रिया । किंभूतं ? अर्थमहार्थखनिं खनिरिव खनि , अर्थमहार्थाना खानि अर्थमहार्थखानिस्त, तत्र भाषाभिधेया अर्था विभाषावार्तिकगोचरा महार्था इति । सुश्रमणव्याख्यानकथने निर्वृतिर्यस्य स तथाविधस्त, तत्र व्याख्यान प्रतीत, कथन–सशये सति विनेयप्रश्नोत्तरका-

लभाविव्याकरणं । अथवा व्याख्यानम्—अनुयोगः, कथनम्—ओघतो धर्मस्य धर्मकथेत्यर्थः । प्रकृत्या—स्वभावेन मधुरवाचं—मधुरगिरम् । इति गाथार्थः ॥ ४१ ॥

सुकुमालकोमलतले तेसिं, पणमामि लक्खणपसत्थे । पाए पावयणीणं, पडिच्छसयएहि पणिवइए ॥४२॥

चूर्णिः—'सुकुमाल'गाहा—पवयणं दुवालसंगं गणिपिडगं जस्स अत्थि सो पावयणी गुरवो त्ति काउं बहुवयणं भणितं ॥ सेसं कंठं ॥ ४२ ॥ एस णमोक्कारो आयरियजुगप्पहाणपुरिसाणं विसेसग्गहणतो कतो, इमो पुण सामण्णतो सुतविसिट्ठाण किज्जइ—

व्याख्या—'सुकुमालकोमल' गाहा—निगदसिद्धा ॥४२॥ एवमावलिकाक्रमेण महापुरुषाणां स्तवमभिधाय साम्प्रतं सामान्येनैव श्रुतधरनमस्कारं प्रतिपिपादयिपुराह—

जे अन्ने भगवंते, कालिअसुयआणुओगिए धीरे । ते पणमिऊण सिरसा, नाणस्स परूवणं वोच्छं ॥४३॥

चूर्णिः—'जे अन्ने' गाहा—कंठा ॥ ४३ ॥ एतं च नाणपरूवणज्झयणं अरिहस्स दिज्जति णो अणरिहस्स, जतो भणितं—

व्याख्या—'जे अन्ने भगवंते' गाहा—ये चान्येऽतीता भाविनश्च भगवन्तः श्रुतरत्नोपेतत्वात् समग्रैश्वर्यादिवन्त इत्यर्थः । कालिकश्रुतानुयोगिनो धीराः सत्त्ववन्तस्तान् प्रणम्य शिरसा—उत्तमाङ्गेन ज्ञानस्य—आभिनिबोधिकादेः प्ररूपणं वक्ष्ये । क एवमाह ? दूष्यगणिशिष्या देववाचक इति गाथार्थः ॥ ४३ ॥ इदं च पञ्चप्रकारं ज्ञानमेतत्प्रतिपादकं चाध्ययनं योग्येभ्य एव विनेयेभ्यो दीयते नायोग्येभ्य इत्यतो योग्यायोग्यविभागोपदर्शनार्थमेव तावदिदमाह—

सेलघण १ कुडग २ चालणि ३, परिपूणग ४ हंस ५ महिस ६ मेसे य ७ ।
मसग ८ जलूग ९ बिराली १०, जाहग ११ गो १२ भेरी १३ आभीरी १४ ॥ ४४ ॥

चूर्णि —'सेलघण' गाहा–एत्थ अरिहा इमे–कुडेसु अप्पसत्थवम्मसारिच्छा पसत्थभावितेसु य अवम्मसारिच्छा । तहा हंसमेसजलूगजाहगसारिच्छा अरिहा, गोभेरीआभीरेसु य पसत्थेतरणतोरणीता अरिहा, सेसा ण अरिहा ॥ ४४ ॥

व्याख्या—'सेलघण' गाहा आह–शुभाध्ययनप्रदानाधिकारे समभावव्यवस्थितानां सर्वसत्त्वहितानां महापुरुषाणामलं योग्यायोग्यविभागनिरीक्षणेन, न हि परहितार्थमिह महादानोद्यता महीयांसोऽर्थिगुणमपेक्ष्य प्रदानक्रियायां प्रवर्तन्ते दयालव इति अत्रोच्यते–ननु यत एव शुभाध्ययनप्रदानाधिकारसमभावव्यवस्थिता सर्वसत्त्वहिताय उद्यता महापुरुषाश्च गुरव अत एव योग्यायोग्यविभागोपदर्शनं न्याय्यं मा भूदयोग्यप्रदाने तत्सम्प्रयोगात्क्षमार्थिजनानर्थ इति, न खलु तत्त्वतोऽनुचितप्रदानेनायासहेतुनाऽविवेकिनमर्थिजनमनुयाजयन्ताऽध्ययनगतपरार्थसम्पादनोपाया भवन्ति दयालव, इत्यत्रधूर्व मिथ्याभिमानमालोच्यतामेतदिति । आह–क इहायोग्यप्रदाने दोष ? इत्युच्यते–स ह्यचिन्त्यचिन्तामणिकल्पमनेकभवशतसहस्रोपात्तानिष्टदुष्टाष्टकर्मराशिजनितदौर्गत्यपरिच्छेदकमपीदमयोग्यप्रदानाद्राप्य न विधिवदासेवते लाघवं चास्य समापादयति, ततो विधिसमासेवक कल्याणमिव महदकल्याणमासादयति, उक्तं च–" आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ ॥ १ ॥" इत्यादि । अतोऽयोग्यप्रदाने दातृकृतमेव वस्तुतस्तस्य तदकल्याणमिति अलं प्रसङ्गेन, प्रकृतं प्रस्तुमः–तत्राधिकृतगाथा प्रपञ्चत आवश्यकानुयोगे व्याख्याता, इह पुनः स्थानाशून्यार्थं भाष्यगाथाभिर्व्याख्यायते—

उल्लेऊण न सक्को, गज्जइ इय मुग्गसेलउ रण्णे। तं संवट्टयमेहो, गंतुं तस्सोवरिं पडइ ॥ १ ॥
दविउ त्ति ठिउ मेहो, उल्लोम्हि णव त्ति गज्जई सेलो। सेलसमं गाहेस्सं, निव्विज्जइ गाहगो एवं ॥२॥
आयरिए सुत्तम्मि य, परिवाओ सुत्तअत्थपलिमंथो। अन्नेसिं पि य हाणी, पुट्ठा वि न दुद्धया वंझा॥३॥
वुट्ठेऽवि दोणमेहे, न कण्हभोमाउ लोट्टए उदगं। गहणधरणासमत्थे, इय देयमछित्तिकारम्मि॥४॥
भाविय इयरे य कुडा, अपसत्थपसत्थभाविया दुविहा। पुप्फाईहि पसत्था, सुरतेल्लाईहिं अपसत्था॥५॥
वम्मा वि अवम्मा वि य, पसत्थवम्मा य होंति अगेज्झा। अपसत्थ अवम्मा वि य, तप्पडिवक्खा भवे गेज्झा॥६
कुप्पवयणउसन्नेहिं, भाविया एवमेव भावकुडा। संविग्गेहि पसत्था, वम्मावम्मा य तह चेव ॥ ७॥
जे पुण अभाविया ते, चउव्विधा अधविमेगमो अन्नो। छिद्दकुडभिन्नखंडे, सगले य परूवणा तेसिं ॥८॥
सेलेय छिद्दचालिणि, मिहो कहा सोउमुट्ठियाणं तु। छिद्दाऽऽह तत्थ विट्ठो, सुमरिंसु सरामि नेयाणिं॥९॥
एगेण विसइ बीएण, नीइ कन्नेण चालणी आह। धन्नोऽत्थ आह सेलो, जं पविसइ नीइ वा तुज्झं ॥१०॥
तावसखउरकढिणयं, चालणिपडिवक्ख न सवइ दवं पि। परिपूणगम्मि य गुणा, गलंति दोसा य चिट्ठंति॥
सव्वन्नुप्पामन्ना, दोसा हु न संति जिणमते केइ। जं अणुवउत्तकहणं, अपत्तमासज्ज व हवेज्जा ॥ १२ ॥

अबलत्तणेण जीहाए, कूचिया होइ खीरमुदयम्मि। हंसो मोत्तूण जलं, आविया पयं तह सुसीसो ॥१३॥
सयम वि न पियइ महिसो, न य जूहं पिवति लो लिय उदग। विग्गह विकहाहि तहा, अथकपुच्छाहि य कुसीसो
अवि गोपयम्मि वि पिवे, सुढिओ तणुयत्तणेण तोमस्स। न करेइ कलुसतोय, मेसे एव सुसीसोऽवि ॥ १५ ॥
मसओ व तुद जच्चा दिएहिं निब्बुन्नवइ कुसीसो निजलुगा व अदूमितो, पियइ सुसीसोऽवि सुयणाण ॥१६॥
छड्डेउ भूमीए, खीर जह पियइ दुट्ठमज्जारी। परिसुठियाण पासे, सिक्खइ एव विणयन्नसी ॥ १७ ॥
पाउ थोव थोव, खीर पासाइ जाहओ लिहइ। एमेव जिय काउ, पुच्छइ मइम न खेएइ ॥ १८ ॥
अणो दो ज्जिहि कल्ले, निरत्थय से वहामि कि चारि। चउचरणगविउ मया, अवण्णहाणी उ बहुयाण ॥१९॥
मा मे होज्ज अवण्णो, गो वज्झा मा पुणो वि न दविज्जा। नयमनि दोज्झामो पुणो, अणुग्गहो अन्नदूहेऽवि॥२०॥
सीसा पडिच्छगाण, भरो त्ति तेऽविय हु सीसगभरो त्ति। न करेंति सुत्तहाणी, अन्नत्थ वि दुल्लहं तेसि ॥२१॥
कोमुदिया संगामिय, उब्भूतीगा उ तिन्नि भेरीउ। कण्हस्सासी उ तया, असिवोवसमी चउत्थी उ॥२२॥
सक्कपसंसा गुणगाहि, केसवो णेमि वंदसुणदंता। आसरयणस्स हरण, कुमारभंगे य पुयजुज्झ ॥२३॥
णेहि जिओम्हि त्ति अहं, असिवोवसमीए सपयाण च। छम्मासियघोसणया, पसमइ न य जायए अन्नो ॥२४॥

आगंतु वाधिखोजे, महिङ्गिमोल्लेण कंयदंरुयता। अठम आराहण अन्न,नेरी अन्नस्स ववणं च ॥२५॥
सुक्कं तया अगहिते, दुपरिग्गहितं कयं तया कलहो। पिट्टण अइचिरविक्कय, गतेसु चोरा यकणग्घं ॥२६॥
सा णिव्हव चि दाउं, उवभज्जिय देहि किं सिचिंतेहि ।वच्चामेलियदाणे,किलिस्ससी तं च हं चेव ।२७।
जणिया जोगाजोगा, सीसा गुरवो य तत्थ दोण्हं पि। वेयालिय गुणदोसो, जोगो जोगस्स जासेज्जा॥२८॥

एव तावद्विभागतो योग्यायोग्यविनेयविभागोपदर्शनं कृत्वा साम्प्रतं सामान्येन पर्षद प्ररूपयन्नाह—

सा समासओ तिविहा पन्नत्ता, तं जहा—जाणिआ अजाणिआ दुव्विअड्ढा, जाणिआ जहा—
खीरमिव जहा हंसा, जे घुट्टंति इह गुरुगुणसमिद्धा। दोसे अ विवज्जंती, तं जाणसु जाणिअं परिसं
॥ ४५ ॥ अजाणिआ जहा—जा होइ पगइ महुरा, मियछावयसीहकुक्कुडयभूआ। रयणमिव असं-
ठविया, अजाणिया सा भवे परिसा ॥ ४६ ॥

चूर्णिः—इमस्स य नाणपरूवणज्झयणस्स परूवणे परिसा 'जाणि' गाहा तिविहा जाणितव्वा. तत्थ जाणिय-" गुणदो-
सविसेसण्णू, अणभिग्गहिता य कुस्सुइमतेसु । सा खलु जाणगपरिसा, गुणतत्तिल्ला अगुणवज्जा ॥ १ ॥ " ॥ ४५ ॥ इमा अजा-
णिया—" पगतीमुद्धमजाणिय, मियछावयसीहकुक्कुरगभूता । रयणमिव असंठविया, सुहसंणप्पा गुणसमिद्धा ॥ १ ॥ "॥ ४६ ॥
इमा दुव्वियड्ढा—

योग्यायोग्य-शिष्याः पर्षत्त्रयञ्च

व्याख्या—'सा समासओ' इत्यादि सूत्रम्—सा पर्षत् समासतः—संक्षेपेण त्रिविधा—त्रिप्रकारा प्रज्ञप्ता—प्ररूपिता, कैः ? तीर्थकरगणधरैरिति गम्यते । तद्यथेत्युदाहरणोपन्यासार्थः । ज्ञिकेत्यत्र ज्ञा अवबोधने इत्यस्य "इगुपधज्ञाप्रीकिरः कः" (पा ३-१-१३५) इति कप्रत्यये, "आतो लोप इटि च" (पा ६-४-६४) इत्याकारलोपे, परगमने, टापि, जानातीति ज्ञा, कप्रत्यये, "प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" (पा ७-३-४४) इतीत्वे, ज्ञिका—परिज्ञानवती, न ज्ञिका अज्ञिका, तद्विलक्षणा दुर्विदग्धा—मिथ्याभिमानगर्भा । तत्थिमा जाणिया—"गुणदोसविसेसण्णू, अणभिग्गहिया य कुस्सुइमएसु । एसा जाणगपरिसा, गुणतत्तिल्ला अगुणवज्जा ॥ १ ॥" ॥ ४५ ॥ इमा तु अजाणिया—"पगईमुद्ध अजाणिय, मिगछावगसीहकुक्कुडगभूया । रयणमिव असंठविया, सुहसण्णप्पा गुणसमिद्धा ॥ १ ॥" ४६ ॥ इमा पुण दुव्वियड्ढा—

दुव्वियड्ढा जहा—न य कत्थइ निम्माओ, न य पुच्छइ परिभवस्स दोसेण ।

वत्थिव्व वायपुण्णो, फुट्टइ गामिल्लयवियड्ढो ॥ ४७ ॥

चूर्णि —"किंचिम्मत्तग्गाही, पल्लवगाही य तुरियगाही य । दुव्वियड्ढिया उ एसा, भणिया तिविहा भवे परिसा ॥१॥" एत्थ जाणिया अजाणिया य अरिहा ॥४७॥ एवं कयमंगलोवयारो थेरावलिकम्मे य दंसिए अरिहेसु य दंसिते, दूसगणिसीसो देववायगो साहुजणहियट्ठाए इणमाह—

व्याख्या —'किंचिम्मत्तग्गाही, पल्लवगाही य तुरियगाही य । दुव्वियड्ढिया उ एसा, भणिया तिविहा भवे परिसा ॥१॥"॥४७॥

साम्प्रतमिष्टदेवतास्तवाभिसम्पादितसकलसौहित्या देववाचकोऽधिकृताध्ययनविषयभूतस्य ज्ञानस्य प्ररूपणां कुर्वन्निदमाह—

नाणं पंचविहं पन्नत्तं, तंजहा-आभिणिबोहियनाणं सुयनाणं ओहिनाणं मणपज्जवनाणं केवलनाणं (सू०१)

चूर्णिः—'नाणं पंचविहं' इत्यादि, णाति णाणं अवबोहमेत्तं भावसाधणो, अहवा णज्जइ अणेणेति नाणं, खओवसमिग-खाइएण वा भावेण जीवादिपदत्था णज्जंति इति णाणं करणसाधणो. अहवा णज्जति एतम्हि ति णाणं नाणभावे जीवो त्ति अधिकरणसाहणो। पंच इति संखा, विधमिति भेदो, पण्णत्तं पण्णवितं परूवितमित्यनर्थान्तरं अत्थतो तित्थकरेहिं सुत्ततो गण-धरेहिं। अहवा पण्णा-बुद्धी पहाणपण्णेण आतातं पण्णत्तं सम्मद्दिट्ठिणा लद्धमित्यर्थः। अहवा पहाणपण्णातो आतातं पण्णत्त तित्थ-करसमीवातो गणधरेहिं लद्धं ति वुत्तं भवति। अहवा पण्णा-बुद्धी तीए आतातं पण्णत्तं तित्थकरगणधरादिएहिं कहिज्जंतं बुद्धीए पण्णत्तमिति. [1]तदित्थणेण अधिकततत्थं नाणं संबज्झति. जे पुव्वमुवण्णत्था पंच णाणभेदा तेसिं पडिपदमब्भुवगमो जहा सद्दो अत्थाभिमुहो णियतो बोधो अभिणिबोधः स एव स्वार्थिकप्रत्ययोपादानादाभिनिबोधिकं। अहवा अभिनिबोधे भवं तेण निव्वत्तं तम्मयं तप्पयोयणं वाऽऽभिणिबोधिकं। अहवा आता तदभिनिबुज्झए तेण वाभिनिबुज्झते तम्हा वा बुज्झते तम्हि वाऽभिनिबुज्झए इत्ततो आभिनिबोधिकं स एवाभिनिबोधिकोपयोगातो अनन्यत्वादाभिनिबोधिकम्। तथा तन्छृणोति तेण वा सुणेति तम्हा वा सुणेति तम्हि वा सुणेतीति सुतं आत्मैव वा श्रुतोपयोगपरिणामानन्यत्वात् शृणोतीति श्रुतम्। अवधीयते इत्यवधिः, तेण वाऽवधीयते तम्हि वाऽवधियते अवधाणं वाऽवधिः-मर्यादेत्यर्थः, ताए परंपरोपणिबंधणातो दव्वादतो अवधीयते इत्यवधिः। परि सव्वतो भावेण गमणं पज्जवणं पज्जवः, मणसि मणसो वा पज्जवो मणपज्जवो, स एव नाणं मणपज्जवनाणं,

[1] 'मंदित्तणेण अधिकतत्थं नाणं' प्र०

तहा पज्जयणं पज्जय, मणसि मणसो वा पज्जय' मन पर्यय, स एव नाण, मणपज्जवनाण, तहा आयो पावण लाभो इत्यनर्थो-
न्तरम्, सव्वतो आतो पज्जातो मणसि मणसो वा पज्जायो मणपज्जायो स एव नाण मणपज्जवनाण अहवा मणसि मणसो
वा पज्जवा मणपज्जवा तेसिं तेसु वा नाणं मणपज्जवनाण, तहा मणसि मणसो वा पज्जया तेसिं तेसु वा नाण मणपज्जयनाण
"गमणपरावत्तेगो, लाभो भेदो य बहुपरावत्ता । मणपज्जवणमि नाणे, णिरुत्तवदणत्थ पचेते ॥ १ ॥" केवलमेग सुद्ध सक-
लमसाधारण अन त चेत्यर्थः, नाणसद्दो य सदत्थाभिनिबोधिकादीण समाणाधिकरणो दट्ठव्वो, तं जहा—आभिनिबोधिक च त
नाण च आभिनिबोधिकनाण, एव सव्वेसु दट्ठव्वं । पुच्छा य—किमेस मतिनाणादियो कमो? एत्थ उत्तर भणति—एसं सकारणो
उवण्णासो इमे य ते कारणा तुल्लसामित्तणतो सव्वकालाविच्छेदठितत्तणतो इंदियाणिंदियणिमित्तत्तणतो तुल्लखतोवसमकारणतो
सव्वदव्वादिविसयसामण्णत्तणतो य परोक्खसामन्नत्तणओ तब्भावे य सेसणाणसभवातो अतो आदीए मतिसुताइ कताइ ।
तेसु वि य मतिपुव्वत सुत ति पुव्व मतिणाण कतं, तस्स य पिट्ठतो सुतं ति । अहवा इंदियाणिंदियनिमित्तत्तणमविसिट्ठवि
मतिसुतेसु परोवदेसत्तणमेत्तभेदातो अरिहंतवयणकारण त्तणतो य मतिविसेसत्तणतो य सुत्तस्स मतिअणतर सुत ति । मतिसुय
समाण कालत्तणतो मिच्छद्दसणपरिग्गहत्तणतो तव्विवज्जद्दसाहस्सत्तणतो सादिसाहस्सत्तणतो य कत्थइ कालेगलाभत्तणतो य
मतिसुताणतर अवधि त्ति भणितो । ततो य छउमत्थसामिसामण्णत्तणतो य पुग्गलविसयसामण्णत्तणतो य खओवसमभावसाम-
ण्णत्तणतो य पच्चक्खभावसामण्णत्तणतो य अवहिसमणतर मणपज्जवनाण ति । सव्वनाणुत्तमत्तणतो सव्वविसुद्धत्तणतो य विरत-
सामिसामण्णत्तणतो सव्वावसाणलाभत्तणतो य सव्वुत्तमलद्धित्तणतो य तदंते केवल भणित ॥ १ ॥

व्याख्या—' नाणं पंचविहं ' इत्यादि, सूत्रम्-ज्ञातिर्ज्ञानं "कृत्यल्युटो बहुलम्" (पा. ३-३-११३) इति वचनाद्भावसाधनः संविदित्यर्थः। ज्ञायते वाऽनेनेति ज्ञानं तदावरणक्षयोपशमादेव, ज्ञायतेऽस्मिन्निति क्षयोपशमे सति ज्ञानम् आत्मैव विशिष्टक्षयोपशमयुक्तो, जानातीति वा ज्ञानं तदेव स्वविषयसंवेदनरूपत्त्वात्तस्य। ' पञ्चविधम् ' इति, अत्र पञ्चेति सङ्ख्यावाचकः, विधानं विधा इति अत्र "डुधाञ् धारणपोषणयोः" इत्यस्यानुबन्धलोपे कृतेऽपि पूर्वस्य स्त्रियां वर्तमानायां "षिद्भिदादिभ्योऽङ्" (पा. ३-३-१०४) इति वर्तमाने "आतश्चोपसर्गे" (पा. ३-३-१०६) इत्यनेनाङ्प्रत्ययः, अनुबन्धलोपे कृते "आतो लोप इटि च" (पा. ६-४-६४) इत्यनेन चाकारलोपे कृते परगमने च "अजाद्यतष्टाप्" (पा. ४-१-४) इति टाप् प्रत्ययः, अनुबन्धलोपः, परगमनं विधा, पञ्च विधाऽस्येति समासः, "ह्रस्वो नपुंसके प्रातिपदिकस्य" (पा. १-२-४७) इति वर्तमाने "गोस्त्रियोरुपसर्जनस्य" (पा. १-२-४८) इत्यनेन ह्रस्वत्वं, सु, अम्भावः पञ्चविधं-पञ्चप्रकारम् इत्येतदेव-मनवद्यं, कुव्याख्याव्यपोहार्थं चैतदेवं निदर्शितमित्यलं प्रसङ्गेन। प्रज्ञप्तं-प्ररूपितं, कैः? अर्थतस्तीर्थकरैः सूत्रतो गणधरैरिति। उक्तं च-"अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं। सासणस्स हिअट्ठाए, तओ सुत्तं पवत्तइ ॥ १ ॥" इति, अनेन स्वमनीषिकाव्यपोहमाह। अथवा प्राज्ञादाप्तं प्राज्ञात्-तीर्थकरात् आप्तमिति प्राप्तं गौतमादिभिः। अथवा प्राज्ञैराप्तं प्राज्ञाप्तं गौतमादिभिः। प्रज्ञया वाऽऽप्तं प्रज्ञाप्तं सर्वैरेव संसारिभिरिति। तथाहि-न प्रज्ञाविकलैरिदमवाप्यते इति भावनीयम्। तद्यथेत्युदाहरणोपन्यासार्थः। आभिनिबोधिकज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानं चेति। तत्रार्थाभिमुखो नियतो बोधोऽभिनिबोधः, स एव स्वार्थिकप्रत्ययोपादानादाभिनिबोधिकम्, अभिनिबोधे वा भवं तेन वा निर्वृत्तं

त मथ तत्प्रयोजन वेत्याभिनिबोधिकम्, अभिनिबुध्यते वा तदित्याभिनिबोधिकम्—अवग्रहादिरूप मतिज्ञानमेव, तस्य स्वसविदितरू-
पत्वाद् भेदोपचारादित्यर्थ । अभिनिबुध्यतेऽनेनेत्याभिनिबोधिक—तदावरणक्षयोपशमनामेति भावार्थ । अभिनिबुध्यतेऽस्मा
दिति वाऽऽभिनिबोधिक तदावरणकर्मक्षयोपशम एव । अभिनिबुध्यतेऽस्मिन्निति वा क्षयोपशमे सति आभिनिबोधिकम् । आ
त्मैव वाऽभिनिबोधोपयोगपरिणामानन्यत्वादभिनिबुध्यत इत्याभिनिबोधिकम् । आभिनिबोधिक च तज्ज्ञान चाभिनिबोधिकज्ञा
नम् । तथा श्रूयत इति श्रुत—शब्द एव भावश्रुतकारणत्वात् कारणे कार्योपचारादिति भावार्थ, श्रूयते वाऽनेनेति श्रुत तदावरण-
क्षयोपशम इति हृदयं, श्रूयतेऽस्मादिति वा श्रुत तदावरणक्षयोपशम एव, श्रूयतेऽस्मिन्निति वा क्षयोपशमे सति श्रुत, आत्मैव श्रु-
तोपयोगपरिणामानन्यत्वात् शृणोतीति श्रुत, श्रुत च तज्ज्ञान च श्रुतज्ञानम् । तथाऽवधीयतेऽनेनेत्यवधि, अवधीयत इत्यधोऽधो
विस्तृत परिच्छिद्यते मर्यादया वेत्यवधि—अवधिज्ञानावरणकर्मक्षयोपशम एव तदुपयोगहेतुत्वादित्यर्थ ।अवधीयतेऽस्मादित्यवधिः
तदावरणकर्मक्षयोपशम, एव, अवधीयतेऽस्मिन्निति वा-वधि, भावार्थ. पूर्ववदेव, अवधान वाऽवधि विषयपरिच्छेदनमित्यर्थ',
अवधिश्चासौ ज्ञान चावधिज्ञानम् । तथा मन'पर्ययज्ञानमित्यत्र परि सर्वतो भावे अयनम् अय गमन वेदनमिति पर्याया, परि
अय पर्यय पर्ययन पयय इत्यर्थ, मनसि मनसो वा पर्ययो मन पर्यय सर्वतस्तत्परिच्छेद इत्यर्थ स एव ज्ञानं मन पर्ययज्ञानम्,
अथवा मनसः पर्याया मन पर्याया धर्मा बाह्यवस्त्वालोचनादिप्रकारा इत्यनर्थान्तर तेषु ज्ञानं मन पर्यायज्ञान, तेषा वा संबन्धि
ज्ञानं मन पर्यायज्ञानम्, इद चार्धतृतीयद्वीपसमुद्रान्तर्वर्तिसंज्ञिमनोगतद्रव्यालम्बनमेवेति भावार्थ । केवलम्—असहाय मत्यादि-
ज्ञाननिरपेक्ष, शुद्धं वा केवलमावरणमलकलङ्काङ्करहित, सकल वा केवल तत्प्रथमतयैवाशेषतदावरणाभावतः सपूर्णोत्पत्तेः, असा-

ज्ञानस्य क्रम हेतवः

धारणं वा केवलमनन्यसदृशमिति हृदयं, ज्ञेयानन्तत्वादनन्तं वा केवलं यथावस्थिताशेषभूतभवद्भाविभावस्वभावावभासि इति भावना, केवलं च तज्ज्ञानं च केवलज्ञानम् । आह-एषां ज्ञानानामित्थमुपन्यासे किं प्रयोजनम् ? इत्युच्यते-इह स्वामिकालकारण विषयपरोक्षत्वसाम्यात् तद्भावे च शेषज्ञानभावादादावेव मतिश्रुतज्ञानयोरुपन्यास इति । तथाहि-य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्य " जत्थ मतिनाणं तत्थ सुयणाणं ति " वचनात्, तथा यावान्मतिज्ञानस्य स्थितिकालस्तावानेवेतरस्य प्रवाहापेक्षयाऽतीतानागतवर्तमानः सर्व एव अप्रतिपतितैकजीवापेक्षया च षट्षष्टिसागरोपमाण्यधिकानीति, उक्तं च भाष्यकारेण-" दो वारे विजयादिसु, गयस्स तिन्नच्चुए अहव ताइं । अइरेग नरभवियं, णाणाजीवाण सव्वद्धं ॥ १ ॥ " यथा मतिज्ञानं क्षयोपशमहेतुकं तथा श्रुतज्ञानमपि, यथा च मतिज्ञानमादेशतः सर्वद्रव्यादिविषयमेवं श्रुतज्ञानमपि, यथा मतिज्ञानं परोक्षमेवं श्रुतज्ञानमपीति । तथा मतिज्ञानश्रुतज्ञानयोरेव चावध्यादिज्ञानभावात् इति । आह-एवमपि मतिज्ञानमादौ किमर्थम् ? इत्युच्यते-मतिपूर्वकत्वात् विशिष्टमत्यंशरूपत्वाद्वा श्रुतस्यादौ मतिज्ञानमिति, उक्तं च-"मतिपुव्वं जेण सुयं, तेणादीए मतिनिसिट्ठो वा । मतिभेओ चेव सुयं, तो मतिसमणंतरं भणियं ॥ १ ॥ " इति, पर्याप्तं विस्तरेण । तथा कालविपर्ययस्वामिलाभसाधर्म्यान्मतिश्रुतज्ञानानन्तरमवधिज्ञानस्योपन्यासः । तथाहि-यावानेव मतिज्ञानश्रुतज्ञानयोः स्थितिकालः प्रवाहापेक्षयाऽप्रतिपतितैकसत्त्वाधारापेक्षया च तावानेवावधिज्ञानस्यापि, अतः स्थितिसाधर्म्यम्, तथा यथैव मतिज्ञानश्रुतज्ञाने विपर्ययज्ञाने भवत एवमिदं मिथ्यादृष्टेर्विभङ्गज्ञानं भवतीति विपर्ययसाधर्म्यं, तथा य एव मतिज्ञानश्रुतज्ञानयोः स्वामी स एवावधिज्ञानस्यापि भवतीति स्वामिसाधर्म्यं, तथा विभङ्गज्ञानिनस्त्रिदशादेः सम्यग्दर्शनावाप्तौ युगपदेव ज्ञानत्रयलाभसंभवाल्लाभसाधर्म्यं । तथा छद्मस्थविषयभावाध्यक्षत्वसाधर्म्यादवधिज्ञानान-

तर मन पर्यायज्ञानस्योपन्यासस्तथाहि यथाऽवधिज्ञान छद्मस्थस्य भवत्येव मनःपर्यायज्ञानमपि छद्मस्थस्यैवति छद्मस्थसाधर्म्यं, तथा यथाऽवधिज्ञान रूपिद्रव्यविषयमेव मन पर्यायज्ञानमपि सामान्येनेति विषयसाधर्म्य, तथाऽवधिज्ञान क्षायोपशमिके भावे तथा मन पर्यायज्ञानमपीति भावसाधर्म्यं, तथा यथाऽवधिज्ञान प्रत्यक्षमेव मन पर्यायज्ञानमपीत्यध्यक्षसाधर्म्यम् । तथा मन पर्यायज्ञानानन्तर केवलज्ञानस्योपन्यास तस्य सकलज्ञानोत्तमत्वात् । तथा अप्रमत्तयतिस्वामिसाधर्म्यात् तथाहि-यथा मन पर्यायज्ञानमप्रमत्तयतेरेव भवत्येव केवलज्ञानमप्यप्रमत्तभावयतेरेवेति साधर्म्यं, तथाऽवसानलाभाच्च, यो हि सर्वज्ञानानि समासादयति स खल्वन्त एवेदमाप्नोतीति भावना, विपर्यायाभावसाधर्म्याच्च, तथाहि-यथा मन पर्यायज्ञान विपर्ययनान न भवत्येव केवलज्ञानमपीति साधर्म्यमल विस्तरेणेति सूत्रार्थ ॥ १ ॥

त समासओ दुविह पण्णत्त, त जहा-पच्चक्ख च परोक्ख च (सू० २)

चूर्णि —'[सव्व ए]' त समासतो दुविह पच्चक्ख परोक्ख चेत्यादि, इह अप्पवत्तव्वत्तणता पुव्व पच्चक्ख पण्णविज्जति, इह जीवो अक्खो, कह ?, उच्यते 'अशू व्याप्तौ' इति णाणप्पणत्ताए अत्थे असइत्ति इच्चेव जीवो अक्खो, णाणभावेण वा चोधेति त्ति भणित भवति, अहवा 'अस भोजने' इच्चेतस्स वा सव्वत्थे असइ त्ति अक्खो पालयति भुङ्क्ते इत्यर्थ , अक्ख पति वट्टति त्ति पच्चक्ख अणिंदिय ति वुत्त भवति । चसद्दाउ य से अवधिमादिभेदा दट्ठव्वा । अक्खातो परेसु ज णाण उप्पज्जति त परोक्ख सभेद (त चेद) चसद्दाउ इंदियमणोनिमित्त दट्ठव्वमिति ॥ २ ॥

१ 'चेोइ त्ति' प्र० ।

व्याख्या—'तं समासतो दुविहं' इत्यादि सूत्रम्--तत्--पञ्चप्रकारं ज्ञानं समासतः--संक्षेपेण 'द्विविधमिति' द्वे विधेअस्येति द्विविधं--द्विप्रकारं प्रज्ञप्तं-प्ररूपितं, तद्यथेत्युदाहरणोपन्यासार्थं प्रत्यक्षं च परोक्षं च, तत्र प्रत्यक्षमित्यत्र जीवोऽक्षः कथं ?, 'अशू व्याप्तौ' इत्यस्य ज्ञानात्मनाऽश्नुतेऽर्थानित्यक्षः व्याप्नोतीत्यर्थः, 'अश भोजने' इत्यस्य वाऽश्नाति सर्वार्थानित्यक्षः पालयति भुङ्क्ते चेत्यर्थः, तमक्षं प्रति वर्तत इति प्रत्यक्षम्, आत्मनोऽपरनिमित्तमवध्याद्यतीन्द्रियमिति भावार्थः। चशब्दः स्वगतानेकभेदप्रदर्शनपरः, विचित्रता चास्योत्तरत्र वक्ष्यामः। परोक्षं चेत्यत्र अक्षस्य-आत्मनो द्रव्येन्द्रियाणि द्रव्यमनश्च पुद्गलमयत्वात्पराणि वर्तन्ते पृथगित्यर्थः, तेभ्योऽक्षस्य यज्ज्ञानमुत्पद्यते तत्परोक्षं परनिमित्तत्वाद्धूमादग्निज्ञानवत्। अथवा परैरक्षासम्बन्धिनं विषयविषयिभावलक्षणमस्येति परोक्षं, चशब्दः पूर्ववत्, एवमन्यत्रापि उत्प्रेक्ष्य चशब्दार्थो वक्तव्यः इति सूत्रार्थः ॥ २ ॥ एवं भेदद्वये उपन्यस्ते सत्यनयोः सम्यक्स्वरूपमनवगच्छन्नाह चोदकः—

सूत्रस्य-चूर्णिः वृत्तिश्च

॥ २३ ॥

अवध्यादीनां साधर्म्यभेदाः।

से किं तं पच्चक्ख ?, दुविहं पण्णत्तं तं जहा-इंदियपच्चक्ख नोइंदियपच्चक्ख च (सू०३)

चूर्णिः—से किं तं पच्चक्खं ? पुच्छा, 'से' त्ति से पच्चक्खनाणभेदो 'किं तं' ति परिपण्हे कतिभेदं ति वुत्तं भवति, तं च किं सरूवं ति, आयरियो य भेदमुवण्णसितुं तस्स रूवकहणेणं पच्चक्खसरूवं कहितुकामो आह--'पच्चक्खं दुविहं पण्णत्तं' ति पुग्गलेहिं संठाणाणिव्वत्तिरूवं दव्विंदियं सोइंदियमादिइंदियाणं सव्वातप्पदेसेहिं स्वावरणक्खतोवसमातो जा लद्धी तं भाविंदियं तस्स पच्चक्खंति इंदियपच्चक्खं (३)॥

व्याख्या—'से किं तं पच्चक्खं' ति सूत्रम्--सेशब्दो मागधदेशीयप्रसिद्धो निपातोऽथशब्दार्थे वर्तते, स च प्रक्रियादि-

वाचक, यथोक्तं—"अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेषु"। इहोपन्यासार्थ । किमिति परिप्रश्ने। तत्–प्रागुपदिष्ट प्रत्यक्षमिति सूत्रार्थं एव चोदकेन प्रश्ने कृते सति न्यायप्रदर्शनार्थमाचार्यश्चोदकोक्तानुवादद्वारेण निर्वचनमभिधातुकाम आह–'पच्चक्ख दुविह पन्नत्त' इत्यादि सूत्रम्, एवमन्यत्रापि यथायोग प्रश्ननिर्वचनसूत्राणां पातनिका कार्येति। प्रत्यक्ष द्विविध प्रज्ञप्त, तद्यथा–इन्द्रियप्रत्यक्ष नोइन्द्रियप्रत्यक्षं च। इन्द्रियाणां प्रत्यक्षमिन्द्रियप्रत्यक्षम्, इह इन्द्र स्वरूपतो ज्ञानाद्यैश्वर्ययुक्तत्वादात्मा, तस्येदमिन्द्रिय, तच्च द्विधा–द्रव्येन्द्रियं भावेन्द्रियं च, तत्र पुद्गलैर्बाह्यसस्थाननिर्वृत्ति कदम्बपुष्पाद्याकृतिविशिष्टोपकरण च द्रव्येन्द्रिय "निर्वृत्त्युपकरणे द्रव्येन्द्रियम्" इति वचनात्, श्रोत्रेन्द्रियादिविषयसर्वात्मप्रदेशानां तदावरणक्षयोपशमलब्धिरुपयोगश्च भावेन्द्रिय, "लब्ध्युपयोगौ भावेन्द्रियम्" इतिवचनात्। इन्द्रियप्रत्यक्ष न भवतीति नोइन्द्रियप्रत्यक्ष नोशब्द सर्वप्रतिषेधे (३)

से किं त इंदियपच्चक्ख? इंदियपच्चक्ख पचविहं पण्णत्तं, त जहा-सोइंदियपच्चक्ख चक्खिंदियपचक्ख घाणिंदिअपच्चक्ख जिब्भिंदिअपच्चक्ख फासिंदिअपच्चक्ख, से तं इंदिअपच्चक्ख (सू० ४)

चूर्णिः— त पचविह। पर आह–णणु दव्विंदियावत्थियपदेसमेत्तग्गहणतो सेसप्पदेसेसु अणुवलद्धी खयोवसमानिरत्थता वा भवति, आयरिय आह–ण एव पदीवादिट्ठतसामत्थतो, जहा चतुसालभवणेगदेसजालितो पदीवो सव्वभवणमुज्जोवेति तहा दव्विंदियमेत्तपदेसविसयपडिबोधओ सव्वातप्पदेसोवयोगत्थपरिच्छेयओ। खयोवसमसाफल्लया य भवति त्ति ण दोसो,

भाविंदियोवयारपच्चक्खत्तणतो एतं पच्चक्खं, परमत्थओ पुण चिंतमाणं एतं परोक्खं, कम्हा?, जहा परा दव्विंदिया भाविंदियस्स य तदायत्तणतो (४)

व्याख्या—'से किं तं' इत्यादि,--अथ किं तदिन्द्रियप्रत्यक्षं?, इन्द्रियप्रत्यक्षं पञ्चविधं प्रज्ञप्तं, तद्यथा-श्रोत्रेन्द्रियप्रत्यक्षमित्यादि, श्रोत्रेन्द्रियस्य श्रोत्रेन्द्रियप्रधानं वा प्रत्यक्षं श्रोत्रेन्द्रियप्रत्यक्षं श्रोत्रेन्द्रियनिमित्तमित्यर्थः. एवं शेषेष्वपि वक्तव्यम्। एतच्चोपचारतः प्रत्यक्षं, न परमार्थतः। कथं ज्ञायते?, इति चेत् सूत्रप्रामाण्यात्, वक्ष्यति च—"परोक्खं दुविहं पण्णत्तं, तं जहा—आभिणिबोहियणाणपरोक्खं च सुयणाणपरोक्खं च"। न च मतिश्रुताभ्यामिन्द्रियमनोनिमित्तमन्यदस्ति यत्प्रत्यक्षमञ्जसा भवेत्, भावे च षष्ठज्ञानप्रसङ्गाद्विरोध इति, तस्मात्परोक्षमेवेदं तत्त्वत इति। आह-इह लोके लिङ्गजं परोक्षमिति प्रतीतमिति, उच्यते-इह यदिन्द्रियमनोभिर्बाह्यलिंगप्रत्ययमुत्पद्यते तदेकान्तेनैवेन्द्रियाणामात्मनश्च परोक्षं, परानिमित्तत्वात्, धूमादग्निज्ञानवत् इति, अतः परोक्षमिति प्रतीतिः। यत्पुनः साक्षादिन्द्रियमनोनिमित्तं तत्तेषामेव प्रत्यक्षं अलिंगत्वात् आत्मनोऽवध्यादिवत् न त्वात्मनः आत्मनस्तु तत्परोक्षमेव परनिमित्तत्वात् लैङ्गिकवत्, इन्द्रियाणामपि तदुपचारतः प्रत्यक्षं न परमार्थतः, कथम्?, अचेतनत्वादिति, अत्र बहु वक्तव्यं, तच्चान्यत्र वक्ष्यामो मा भूत् प्रथमग्रन्थ एव प्रतिपत्तिगौरवमित्यलं विस्तरेण। आह--स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीन्द्रियाणीति क्रमः, अयमेव च ज्यायान् पूर्वपूर्वलाभ एवोउत्तरोत्तरलाभात्, अतः किमर्थमुत्क्रमः?, उच्यते--पश्चानुपूर्व्यादिन्यायज्ञापनार्थं स्पष्टसंवेदनद्वारेण सुखप्रतिपत्त्यर्थं चेति। इह मनोज्ञानमपी- न्द्रियज्ञानतुल्ययोगक्षेममेव द्रष्टव्यं, तथा चाभिनिबोधिकज्ञानप्ररूपणायां प्रवक्ष्यते इति। 'से तं इंदियपच्चक्खं' तदेतदिन्द्रियप्रत्यक्षम्(४)

से किं त नोइदियपच्चक्ख ?, नोइदियपच्चक्ख तिविह पण्णत्त, त जहा-ओहिनाणपच्चक्ख मणपज्जवनाणपच्चक्ख केवलनाणपच्चक्ख (सू० ५) से किं त ओहिनाणपच्चक्ख ?, ओहिनाणपच्चक्ख दुविह पण्णत्त, त जहा भवपच्चइअ च खओवसमिअ च (सू० ६) । से किं त भवपच्चइअ ? २ दुण्ह, त जहा-देवाण य नेरइआण य [सू०७] से किं त खओवसमिअ?, खओवसमिअ दुण्ह, त जहा -मणूसाण य पचिंदिअतिरिक्खजोणिआण य । को हेऊ खओवसमिअ ?, खओवसमिअ तयावरणिज्जाण कम्माण उदिण्णाण खएण अणुदिण्णाण उवसमेण ओहिनाण समुपज्जइ [सू० ८]

चूर्णि —'णोइंदियपच्चक्ख' ति इदियातिरित्त, त तिविह ओहिमादी अवहि त्ति मज्जाया, सा य रूविदव्वेसु त्ति रूविस्स विधीत्ति वयणातो, तेसु णाण ओहिणाण । भवपच्चइय ति भणिते भण्णति-णणु ओधी खयोवसमिते भावे णारगादिभवो सो उदइए भावे (ततो) कह भवपच्चइतो भण्णति त्ति?, उच्यते-सो वि खयोवसमितो चेव, किंतु सो चेव खयोवसमो णारगदेवभवेसु अवस्स भवति त्ति दिट्ठतो-पक्खीण आगासगमण व एव भवपच्चइतो भण्णति । खयोवसमिय पुण णरतिरियाण, तेसु णावस्स उप्पज्जति त्ति खयोवसममवेक्खति खयोवसमसरूव च सुत्तेणेव भणित । को हेतु त्ति इच्चादि । सो य खयोवसमो गुणमतरेण गुणपडिवत्तितो वा भवति, गुणमतरेण जहा--गगणब्भच्छादिते अहापवत्तितो,

छिद्देणं दिणकरकिरणव्व विणिस्सिता दव्वमुज्जोवेंति, तहाऽवधिमावरणखयोवसमे अवधिलंभो अथापवत्तितो विण्णतो (५-८)

वृत्तिः—'से किं तं णोइंदियपच्चक्खं' अथ किं तत् नोइन्द्रियप्रत्यक्षं ?, नोइन्द्रियप्रत्यक्षं त्रिविधं प्रज्ञप्तं, तद्यथा अवधिज्ञानप्रत्यक्षमित्यादि। 'से किं तं' इत्यादि सूत्रम्-अथ किं तदवधिज्ञानप्रत्यक्षं ?, अवधिज्ञानप्रत्यक्षं द्विविधं प्रज्ञप्तं, तद्यथा-भवप्रत्ययं च क्षायोपशमिकं च, तत्र भवन्त्यस्मिन् कर्मवशवर्तिनः प्राणिन इति भवः नारकादिजन्मेति भावः, भव एव प्रत्ययः-कारणं यस्य तद्भवप्रत्ययं। चः पूर्ववत्। तथा क्षयश्चोपशमश्च क्षयोपशमौ, ताभ्यां निर्वृत्तं क्षायोपशमिकं। तत्र यद्येषां भवति तत्तेषामुपदर्शयन्नाह-'दुह्नं' इत्यादि, द्वयोः जीवसमूहयोः भवप्रत्ययं, तद्यथा-देवानां नारकाणां च, तत्र दीव्यन्तीति देवाः निरुपमक्रीडामनुभवन्तीत्यर्थः तेषां, तथा नरान् कायन्तीति नरकाः योग्यतया शब्दयन्तीत्यर्थः तेषु भवा नारकास्तेषाम्। अत्राह-नन्ववधिज्ञानं क्षायोपशमिके भावे वर्तते, देवनारकभवश्चौदयिकः, तत्कथं तद्भवप्रत्ययमिति ?, उच्यते-क्षायोपशमिकमेव तत् किंतु स एव देवनारकभवेऽवश्यंभावी पक्षिणां गगनगमनलब्धिनिमित्तवत् इत्यतो भवप्रत्यय इति, उक्तं च--"उदयखयखयोवसमोवसमा जं च कम्मुणो भणिया। दव्वं खेत्तं कालं, भवं च भावं च संपप्प ॥ १ ॥" तथा द्वयोः क्षायोपशमिकं, तद्यथा-मनुष्याणां पञ्चेन्द्रियतिर्यग्योनीनां च, न चैषामवश्यंतया भवतीत्यतः सत्यपि क्षायोपशमिकत्वे भवप्रत्ययाद्भिन्नमिदमिति, तत्वतस्तु सर्वमेव क्षायोपशमिकमिति। अधुना क्षयोपशमस्वरूपं प्रतिपादयन्नाह-'को हेऊ' इत्यादि, को हेतुः किं निमित्तं किं विषयं क्षायोपशमिकं ? यद्वा किं कारणं क्षायोपशमिकमुच्यते इत्यध्याहारः अत्र निर्वचनमभिधातुकाम आह-क्षायोपशमिकं तदावरणीयानाम् अवधिज्ञानावरणीयानां कर्मणामुदीर्णानाम्-उदयावलिकाप्राप्तानां क्षयेण

प्रलयन अनुदीर्णानां च आत्मनि व्यवस्थितानामुपशमेन उदयनिरोधेन अवधिज्ञानमुत्पद्यत इति सबन्ध । यत एवमत कर्मोदयविरयम् । अथवा येन तदावरणीयानां कर्मणामुदीर्णानां क्षयेणानुदीर्णानामुपशमेनावधिज्ञानमुत्पद्यते तेन क्षायोपश मिकमित्युच्यते इति। स च क्षयोपशमो विशिष्टगुणप्रतिपत्तिमन्तरेण तथागुणप्रतिपत्तितश्च भवति, तत्रान्तरेण यथाऽऽकाशे पनपटलाच्छादितमूर्तेर्दिवसकरमण्डलस्य कथञ्चिदुपजातरन्ध्रेण विनिर्गतास्तिमिरनिचयप्रलयहेतव किरणा स्वावपातदेशा-स्पद द्रव्यमुद्योतयन्ति तथा प्रकृतिभास्वरस्यात्मनो मिथ्यात्वादिजनितज्ञानावरणीयादिकर्ममलपटलतिमिरतिरस्कृतस्वभाव-स्यानादौ ससारे परिभ्रमतो यथाप्रवृत्त्योपजातावधिज्ञानावरणक्षयोपशमविवरस्यावधिज्ञानालोक प्रसाधयति स्वकार्यमिति, गुणप्रतिपत्तिस्तु मूलगुणादिप्रतिपत्तेर्भवति । यत आह—

अहवा गुणपडिवन्नस्स अणगारस्स ओहिनाण समुप्पज्जइ, त समासओ छव्विह पन्नत्त, त जहा-आणुगामिय १ अणाणुगामिय २ वड्ढमाणय ३ हीयमाणय ४ पडिवाइयं ५ अप्पडिवाइय ६ [सू० ९]।

चूर्णि —'गुणपडिवन्न'इत्यादि–उत्तरुत्तरचरणगुणविसुज्झमाणवेक्खातो अवधिणाणदसणावरणाण खयोवसमो भवति, तक्खयोवसमेण अवधी उप्पज्जति । अणुगामिय ति अणुगमणसीलो अणुगामितो तदावरणखयोवसमातप्पदेसविसुद्धगमण ातो लोयण व ॥

वृत्तिः—'अथवा' इत्यादि, अथवेति प्रकारान्तरप्रदर्शनार्थम्, अन्तरेण प्रतिपत्तिमित्यस्मादिदं प्रकारान्तरमेव । गुणाः--मूलगुणादयस्तैः प्रतिपन्नो—गृहीतो गुणप्रतिपन्न इति, अनेनातिशयपात्रतामाह, यतः पात्राश्रयिणो, गुणाः, उक्तं च-"नोदन्वानर्थितामेति, न चाम्भोभिर्न पूर्यते । आत्मा तु पात्रतां नेयः, पात्रमायान्ति सम्पदः ॥ १ ॥" अथवा प्राकृतशैल्या पूर्वापरनिपातकरणात् प्रतिपन्नगुणस्य अनगारस्य, न गच्छन्तीत्यगाः- वृक्षास्तैः कृतमगारं--गृहं, नास्यागारं विद्यते इत्यनगारः-परित्यक्तद्रव्यभावगृह इत्यर्थः, तस्य प्रशस्ताध्यवसायस्य तदावरणकर्मक्षयोपशमे सत्यवधिज्ञानं समुत्पद्यते। 'तं समासतो' इत्यादि, तत् अवधिज्ञानं समासतः--संक्षेपण षड्विधं--षट्प्रकारं प्रज्ञप्तं-प्ररूपितं। तद्यथा-'आनुगामुकम्' अनुगमनशीलमानुगामुकमवधिज्ञानं लोचनवद्गच्छन्तमनुगच्छतीति भावार्थः । 'अनानुगामुक' नावधिज्ञानिनं गच्छन्तमनुगच्छति शृङ्खलाप्रतिबद्धप्रदीपवत् इति हृदयं । (वर्धते इति) वर्धमानं, तदेव वर्धमानकं, "संज्ञायां कन्" (पा० ५-३-८७) उत्पत्तिकालादारभ्य प्रवर्धमानं महेन्धननिबन्धनोत्पद्यमानानलज्वालाकलापवदिति भावना 'हीयमानकं' हीयते इति हीयमानं, तदेव हीयमानकं कुत्सायां कन् ('कुत्सिते' पा० ५-३-७४, इत्यनुवर्तमाने 'संज्ञायां कन्' पा० ५-३-७५ इत्यनेन), उदयसमयसमनन्तरमेव हीयमानं दग्धेन्धनप्रायधूमध्वजार्चिर्व्रातवदित्यर्थः । 'प्रतिपाति' प्रतिपतनशीलं प्रतिपाति, कथञ्चिदापादितजात्यमणिप्रभाजालवदिति गर्भार्थः । 'अप्रतिपाति' न प्रतिपाति अप्रतिपाति क्षारमृत्पुटपाकाद्यापाद्यमानजात्यमणिकिरणनिकरवदित्यभिप्रायः । आह--आनुगामुकानानुगामुकभेदद्वय एव शेषभेदानां वर्धमानकादीनामन्तर्भावात् किमर्थमुपन्यास इति?, उच्यते--सत्यप्यन्तर्भावे तद्विकल्पद्वयादेव तेषामपरिच्छित्तेः, तथाहि--नानुगामुकमनानुगामुकं चेत्युक्ते वर्धमानकादयो गम्यन्ते इत्यज्ञातज्ञापनार्थं च शास्त्रे प्रवृत्तिरित्यलं प्रसङ्गेन ॥

॥ २६ ॥

से किं तं आणुगामिय ओहिनाण ?, आणुगामिय ओहिनाणं दुविह पण्णत, त जहा-अतगय च मज्झगय च । से किं त अतगय ?, अतगय तिविह पन्नत्त, तं जहा-पुरओ अतगय मग्गओ अतगय पासओ अतगय । से किं त पुरओ अतगय ?, पुरओ अंतगय-से जहानामए केइ पुरिसे उक्क वा चडुलिअ वा अलाय वा मणि वा पईव वा जोइ वा पुरओ काउ पणुल्लेमाणे २ गच्छेज्जा, से त पुरओ अतगय । से कि त मग्गओ अतगय?, मग्गओ अतगय से जहानामए केइ पुरिसे उक्क वा चडुलिअ वा अलाय वा मणिं वा पईव वा जोइ वा मग्गओ काउ अणुकड्ढेमाणे २ गच्छिज्जा, से त मग्गओ अतगय । से किं त पासओ अतगय ?, पासओ अतगय-से जहानामए केइ पुरिसे उक्क वा चडुलिअ वा अलाय वा मणिं वा पईव वा जोइ वा पासओ काउ परिकड्ढेमाणे २ गच्छिज्जा, से त पासओ अतगय । से किं त मज्झगय ?, मज्झगय-से जहानामए केइ पुरिसे उक्क वा चडुलिअ वा अलात वा मणिं वा पईव वा जोइ वा मत्थए काउ समुव्वहमाणे २ गच्छिज्जा, से त मज्झगय ॥

चूर्णि —'अतगय' ति जहा जलत वणत पज्जवत अवसिट्ठो अतसद्दो, एव ओरालियसरीरते ठित गत ति एगट्ठ, त च

आतप्पदेसफड्डगाबहि एगदिसोवलंभाओ य अंतगतमोहिणाणं भण्णति, अहवा सव्वातप्पदेसविसुद्धेसु वि ओरालियसरीरगं-तेण एगदिसि पासणं गतं ति अंतगतं भण्णति, अहवा फुडतरमत्थो भण्णति एगदिसावधिउवलद्धखेत्तातो सो अवधिपुरिसो अंतगतो त्ति जम्हा तम्हा अंतगतं भण्णाति । मज्झगतं पुण ओरालियसरीरमज्झे फड्डगविसुद्धीतो सव्वातप्पदेसविसुद्धीतो वा सव्वदिसोवलंभत्तणतो मज्झगतो त्ति भण्णति, अहवाऽवधिउवलद्धिखेत्तस्स वा अवधिपुरिसो मज्झगतो त्ति अतो वा मज्झगतो ओही भण्णति । 'उक्कं' त्ति दीविया, 'चुडलि' त्ति तणपिंडी अग्गे पज्जालिता, 'अलातं' ति दारुयं जलंतं, मणिं वा जलिंति 'जोइं' मल्लगादिठितं अगणिं जलंतं, 'पदीवो' त्ति दीवतो, 'पुरतो' त्ति अग्गतो 'पणोल्लणं' ति 'णुद प्रेरणे' हत्थगहितस्स डंडगगहितस्स वा परंपरेण नुदन्नित्यर्थः, 'मग्गतो' त्ति पिट्ठतो, 'अणुकड्ढणं, ति हत्थगाहितस्स डंडगगहियस्स वा अणु-पच्छा या कड्ढणं ति, 'पासतो' त्ति दाहिणे वा वामे वा पासे दोसु वा सयं जमलठितं, परिकड्ढियं, ति हत्थडंड-गठितं वा परिपासतो ठितस्स कड्ढणं परिकड्ढणं ॥ सीसो पुच्छति—

वृत्तिः—'से किं तमाणुगामिकं' इत्यादि, अथ किं तदानुगामुकमवधिज्ञानं ?, आनुगामुकमवधिज्ञानं द्विविधं प्रज्ञप्तं, तद्यथा--अन्तगतं च मध्यगतं च । इहान्तः--पर्यन्तो भण्यते, वनान्तवत् गतं स्थितमित्यनर्थान्तरम् । अन्ते गतमन्तगतम् अन्ते स्थितं, तच्च फड्डका (स्पर्धका) वधित्वादात्मप्रदेशान्ते सर्वात्मप्रदेशक्षयोपशमभावतो वा औदारिकशरीरान्ते एकदिगुपल-म्भाद्वा तदुद्योतितक्षेत्रान्ते गतमन्तगतम् ,इह तच्चात्मप्रदेशान्तगतमुच्यते सकलजीवोपयोगे सत्यपि साक्षादेकदेशेनैव दर्शनात्, औदारिकशरीरान्तगतमपि औदारिकशरीरैकदेशेनैव दर्शनाच्च, यथोक्तं क्षेत्रान्तगतं त्ववधिमतस्तदन्तवृत्तेरिति भावना । चशब्दः पूर्ववत् । 'मध्यगतं च' इह मध्यः प्रसिद्ध एव दण्डादिमध्यवत्, मध्ये गतं मध्यगतं मध्ये स्थितं, तच्च सर्वत्र फड्डक-

विशुद्धिरात्ममध्ये सर्वात्ममध्ये सर्वात्मनो वा क्षयोपशमयोगाविशेषेऽप्यौदारिकशरीरमध्योपलब्धेस्तन्मध्ये सर्वदिशुपलम्भाद्वा तत्प्रकाशितक्षेत्रमध्ये गत मध्यगतम्, अत्र चात्ममध्यगतमभिधीयते, सर्वात्मोपयोगे सत्यपि मध्य एव स्पर्द्धकसद्भावात् साक्षान्मध्यमागेनोपलब्धे', औदारिकशरीरमध्यगतमपि औदारिकशरीरमध्यभागेनैवोपलब्धे, प्रस्तुतक्षेत्रमध्यगत पुनरवधिज्ञानिन' तत्र मध्ये भावादिति भावार्थः चशब्द' पूर्ववत् । 'से किं त' इत्यादि प्राय सुगमम्, नवर उल्का–दीपिका, चुडली–पर्यन्तज्वलिता तृणपूलिका, अलातम्-उल्मुक, मणि' पद्मरागादि, प्रदीपशिखादिज्योति, मल्लिकाद्याधारोऽग्नि, प्रदीप प्रतीतः पुरत.–अग्रत, हस्तदण्डादौ गृहीत्वा 'पणोल्लेमाणे पणोल्लेमाणे' त्ति प्रेरयन् २ गच्छेत्–यायात्, 'से त' तदेतत् पुरतोऽन्तगतम्, अयमत्र भावार्थ.–स हि गच्छन् उल्कादिभ्यः सकाशात् पुरत एव पश्यति, नान्यत्र एव यतोऽवधिज्ञानाद्विशिष्टक्षयोपशमनिमित्तत्वादेशपुरत एव पश्यति, नान्यत्र, तत्पुरतोऽन्तगतमभिधीयते इत्येतावता अशेन दृष्टान्त इत्येत्र सर्वत्र योजना। 'से किं त' इत्यादि, निगदसिद्ध नवर अणुकड्ढेमाणे २ त्ति अनुकर्षन् २ । एव 'परिकड्ढेमाणे २' इति परिकर्षन् २ । 'अथ किं तन्मध्यगतम्' इत्यादि निगदसिद्धमेव, नवर मस्तके–शिरसि कृत्वा गच्छेत् । तदेतन्मध्यगतमिति एतदुक्त भवति–स येन मस्तकस्थेन सर्वत्र तत्प्रकाशितमर्थं पश्यति, परमेव यतोऽवधिज्ञानाचदुद्योतितार्थावगमस्तन्मध्यगत मित्येतावता अशेन दृष्टान्त इति ॥ इह व्याख्यातार्थे सम्यगनवगच्छन्नाह चोदक —

अतगयस्स मज्झगयस्स य को पइविसेसो?, पुरओ अतगएणं ओहिनाणेण पुरओ चेव सखिज्जाणि वा असखेज्जाणि वा जोअणाइ जाणइ पासइ, मग्गओ अतगएण ओहिनाणेण मग्गओ

चेव संखिज्जाणि वा असंखिज्जाणि वा जोयणाइं जाणइ पासइ, पासओ अंतगएणं पासओ चेव संखिज्जाणि वा असंखिज्जाणि वा जोयणाइं जाणइ पासइ, पासओ अंतगएणं पासओ चेव संखिज्जाणि वा असंखिज्जाणि वा जोयणाइं जाणइ पासइ मज्झगएणं ओहिनाणेणं सव्वओ समंता संखिज्जाणि वा असंखिज्जाणि वा जोयणाइं जाणइ पासइ। से तं आणुगामियं ओहिनाणं(सू०१०)

चूर्णिः—'अंतगतस्स' इच्चाइ। आयरियाह—'पुरतो' इच्चाइ। 'सव्वतो' त्ति सव्वासु वि दिसिविदिसासु, समंता इति सव्वातप्पदेसेसु सव्वेसु वा विसुद्धफड्डगेसु वा, अहवा 'सव्वतो' त्ति सव्वासु दिसिविदिसासु सव्वातप्पदेसफड्डगेसु य, 'स' इति निद्देसे अवधिपुरिसस्स 'मंता' इति णाता, अहवा समं दव्वादयो तुल्ला, 'अत्ता' इति आत्मा इत्यर्थः।

वृत्तिः—'अंतगतस्स मज्झगतस्स य' इत्यादि सूत्रं सिद्धं यावत्।'मज्झगतेणं' इत्यादि, मध्यगतेनावधिज्ञानेन सर्वतः— सर्वासु दिग्विदिक्षु समन्तात्—सर्वैरात्मप्रदेशैर्विशुद्धफड्डकैर्वा सङ्ख्येयानि वा असंख्येयानि वा योजनानि जानाति पश्यति, अथवा स मन्ता अवधिज्ञान्येव च गृह्यते, संख्येयानि चेत्यत्र संख्यायन्त इति संख्येयानि एकादीनि शीर्षप्रहेलिकापर्यन्तानि गृह्यन्ते, तत ऊर्ध्वमसङ्ख्येयानि, तदेतदानुगामुकमवधिज्ञानमिति ॥

से किं तं अणाणुगामिअं ओहिनाणं ?, अणाणुगामिअं ओहिनाणं से जहा नामए केइ पुरिसे एगं महंतं जोइट्ठाणं काउं तस्सेव जोइट्ठाणस्स परिपेरंतेहिं २ परिघोलेमाणे २ तमेव जोइट्ठाणं

पासइ, अन्नत्थ गए न पासइ, एवामेव अणाणुगामिअ ओहिनाण जत्थेव समुप्पज्जइ तत्थेव सखेज्जाणि असखेज्जाणि वा सवद्धाणि वा असवद्धाणि वा जोअणाइ जाणइ पासइ, अन्नत्थ गए ण पासइ से त अणाणुगामिअ ओहिनाण (सू० ११) ।

चूर्णि'—णो गच्छति त्ति अणाणुगामिक सकलापडिबद्धठितपदीवो व्व, तस्स य खेताबेक्खखयोवसमलाभत्तणतो अणाणुगामित 'पेरत' ति समततो अगणिपासण, तस्स य जोइस्स सव्वतो दिसिविदिसासु समता 'परिघोलण' ति पुणो २ इतो २ परिसक्कण ॥

वृत्ति —'से किं त' इत्यादि प्रकटार्थमेव, नवर ज्योति'स्थानम्-अग्निस्थान कृत्वा तस्यैव ज्योति'स्थानस्य पर्यन्तेपु । किमेकदिग्गतेपु ?, नेत्याह-परि' सर्वतो भावे, ततश्च परिपर्यन्तेपु २ परिघूर्णन्-परिभ्रमन्नित्यर्थ , तदेव ज्योति स्थान-ज्योतिः प्रकाशित क्षेत्रमित्यर्थ पश्यति,अन्यत्र गतो न पश्यति,तदुपलम्भाभावात् तदावरणक्षयोपशमस्य तत्क्षेत्रसबन्धसापेक्षत्वात्। एवमेव अनानुगामुकमवधिज्ञान यत्रैव क्षेत्रे व्यवस्थितस्य सत समुत्पद्यते तत्रैव व्यवस्थित' सन् सख्येयानि वाऽसख्येयानि वा योजनानि सवद्धानि वाऽसवद्धानि वा जानाति पश्यति, नान्यत्र, क्षेत्रसबन्धसापेक्षत्वादवधिज्ञानावरणक्षयोपशमस्य । तदेतदनानुगामुकम् ॥

से किं त वड्ढमाणय ओहिनाण ? २ पसत्थेसु अज्झवसाणट्ठाणेसु वट्टमाणस्स वट्टमाणचरि-

तस्स विसुज्झमाणस्स विसुज्झमाणचरित्तस्स सव्वओ समंता ओही वड्ढइ–जावइया तिसमयाहारगस्स सुहुमस्स पणगजीवस्स। ओगाहणा जहन्ना-ओहीखित्तं जहन्नं तु ॥ ४८ ॥ सव्वबहुअगणिजीवा, निरंतरं जत्तियं भरिज्जंसु । खित्तं सव्वादिसागं, परमोही खेत्तनिद्दिट्ठो ॥ ४९ ॥ अंगुलमावलिआणं, भागमसंखिज्ज दोसु संखिज्जं । अंगुलमावलिअंतो, आवलिआ अंगुलपुहुत्तं ॥ ५० ॥ हत्थम्मि मुहुत्तंतो, दिवसंतो गाउअम्मि बोद्धव्वो । जोयणदिवसपुहुत्तं, पक्खंतो पन्नवीसाओ ॥५१॥ भरहम्मि अद्धमासो, जंबूद्दीवम्मि साहिओ मासो । वासं च मणुअलोए, वासपुहुत्तं च रुअगम्मि ॥ ५२ ॥ संखिज्जम्मि उ काले, दीवसमुद्दाऽवि हुंति संखिज्जा । कालम्मि असंखिज्जे, दीवसमुद्दा उ भइअव्वा ॥५३॥ काले चउण्ह वुड्ढी, कालो भइअव्वु खित्तवुड्ढीए। वुड्ढीए दव्वपज्जव, भइअव्वा खित्तकाला उ ॥ ५४ ॥ सुहुमो अ होइ कालो, तत्तो सुहुमयरं हवइ खित्तं । अंगुलसेढिमित्ते, ओसप्पिणिओ असंखिज्जा ॥ ५५ ॥ से तं वड्ढमाणयं ओहिनाणं (सू० १२) ।

चूर्णि:—वद्धंतं वुड्ढी पुव्वानत्थातो उवरुवरि वड्ढमाणं ति, तं च उस्सण्णं चरणगुणविसुद्धिमवेक्खत्तणतो पसत्थज्झवसाणट्ठाणातो जदि पसत्थलेसाणुगता भवंति, पसत्थदव्वलेसाहिं अणुरंजितं चित्तं पसत्थज्झवसाणं भण्णति, पसत्थज्झवसाणातो य

चरणागतविसुद्धीतो य चरणपच्चतलद्धीण वुड्ढी भवति। इमाओ य जहण्णुक्कोसविमज्झिमोधिवुड्ढीदसणगाहाओ जहा पेढीयाए।

तहा उत्तर हेतुजुर्वीए चेव भण्णति "देसण्णाणोवरमे, जह केवलणाणसभवो भणितो। देसदसणविगमे, तह केवलदसण होतु ॥ १८ ॥ अह देसनाणदसण विगमे तव केवल मत नाण। न मत केवलदसणमिच्छामेत्त णणु तवेद ॥ १९ ॥" किंच भण्णति जहोहिणाणी, जाणावै पासति य भासित सुत्ते। ण य णाम ओहिदसण- नाणेगत्त तह इम पि ॥ २० ॥" एव पराभिप्पाये पडिसिद्धे एगतरोवयोगता सिद्धा तहाविम भण्णति- "जह पासइ तहा पासउ, पासति जेणव दसण त से। जाणइ जेण अरिहा, त से णाण ति घेतव्व ॥ २१ ॥" किंच सिद्धाधिकारे एगवरोवयोगदसिगा इमा फुडा गाहा-"नाणम्मि दसणम्मि य एत्तो एगयरयम्मि उवउत्ता। सव्वस्स केवलिस्सा, जुगव दो णत्थि उवयोगा ॥ २२ ॥" किंच भगवतीए "उवयोगो एगतरो पणुवीसतिमे सए सिणायस्स। भणितो विगडत्थो च्चिय छट्ठुद्देसे विसेसेण ॥ २३ ॥" किं च "कस्स व णाणुमतमिण, जिणस्स जति होज्ज दोऽवि उवयोगा। णूण ण हाति जुगव, जतो णिसिद्धा सुते बहुसो ॥ २४ ॥" 'अह सव्वदव्व' गाहा— (४ठा)

वृत्ति—'से किं त परपर' इत्यादि, न प्रथमसमयसिद्धा अप्रथमसमयसिद्धा' परपरसिद्धविशेषण प्रथमसमयवर्तिन सिद्धत्वसमयाद्द्वितीयसमयवर्तिन इत्यर्थ, त्र्यादिषु तु द्विसमयासिद्धादय' प्रोच्यन्ते, यद्वा सामान्येनाप्रथमसमयसिद्धा अभिधानविशेषतो द्विसमयादिसिद्धाभिधानमिति। शेष प्रकटार्थं यावत् 'त समासओ' इत्यादि, तदिति सामान्येन केवलज्ञानमभिगृह्यते, द्रव्यत. केवलज्ञानी सर्वद्रव्याणि धर्मास्तिकायादीनि सक्षाज्जानाति पश्यति, क्षेत्रत केवलज्ञानी सव क्षेत्र लोकालोकभेदभिन्न साक्षाज्जानाति पश्यति, इह च धर्मास्तिकायादिसर्वद्रव्यग्रहणे सत्यप्याकाशास्तिकायस्य क्षेत्रत्वेन

रूढत्वाद्भेदेनोपन्यासः, कालतः केवलज्ञानी सर्वं कालमतीतानागतवर्तमानभेदभिन्नं साक्षाज्जानाति पश्यति, भावतः केवलज्ञानी सर्वान् जीवाजीवगतान् भावान् गतिकषायागुरुलघुलक्षणादीन् साक्षाज्जानाति पश्यति । इह च केवलज्ञानदर्शनोपयोगचिन्तायां क्रमोपयोगादौ सूरीणामनेकविधा विप्रतिपत्तिः, अतः संक्षेपतो विनेयजनानुग्रहाय तत्प्रदर्शनं क्रियत इति, तत्र- "केयी भणंति जुगवं, जाणइ पासइ य केवली णियमा । अन्ने एगंतरियं, इच्छंति सुओवएसेणं ॥ १ ॥ अन्ने ण चेव वीसुं, दंसणमिच्छंति जिणवरिंदस्स । जं चिय केवलनाणं, तं चिय से दंसणं बिंति ॥ २ ॥" गाथाद्वयम् , अस्य व्याख्या- केचन सिद्धसेनाचार्यादयः भणन्ति, किं ? युगपत्- एकस्मिन्नेव काले जानाति पश्यति च, कः ? केवली, न त्वन्यः, 'नियमात्' नियमेन । अन्ये जिनभद्रगणिक्षमाश्रमणप्रभृतयः एकान्तरितं जानाति पश्यति चेत्येवमिच्छन्ति श्रुतोपदेशेन-यथाश्रुतागमानुसारेणेत्यर्थः । अन्ये तु वृद्धाचार्याः 'न' नैव विष्वक्-पृथक् दर्शनमिच्छन्ति जिनवरेन्द्रस्य-केवलिनः इत्यर्थः, किं तर्हि ? यदेव केवलज्ञानं तदेव 'से' तस्य केवलिनो दर्शनं ब्रुवते क्षीणावरणस्य देशज्ञानाभाववत्केवलदर्शनाभावादिति भावना । अयं गाथाद्वयार्थः । साम्प्रतं युगपदुपयोगवादिमतप्रदर्शनायाह- "जं केवलाइ सादी, अपज्जवसियाइ दोऽवि भणियाइं । ता बिंति केइ जुगवं, जाणइ पासइ य सव्वन्नू ॥ ३ ॥" यस्मात् केवलज्ञानदर्शने साद्यपर्यवसिते द्वे अपि भणिते ततः ब्रुवते केचन सिद्धसेनाचार्यादयः, किं ? 'युगपत्' एकस्मिन् काले जानाति पश्यति च, कः ? सर्वज्ञ इति गाथार्थः । "इहरादीणिधणत्तं, मिच्छावरणक्खयो त्ति व जिणस्स । इयरेतरावरणता, अहवा निक्कारणावरणं ॥ ४ ॥" इतरथा' अन्यथा आदिनिधनत्वं- सादिपर्यवसानत्व' केवलज्ञानदर्शनयोरुत्पत्त्यनन्तरमेव केवलज्ञानोपयोगकाले केवलदर्शनाभावात्, एवं केवलदर्शनोपयोगकालेऽपि

केवलज्ञान
दर्शनोप-
योग वादः

केवलज्ञानाभावात्। तथा मिथ्याऽऽवरणक्षय इति वा जिनस्य, न ह्यपनीतावरणौ द्वौ प्रदीपौ क्रमेण प्रकाश्य प्रकाशयत इत्य-भिप्राय । तथेतरेतरावरणता स्वावरणे क्षीणेऽप्यन्यतमभावेऽन्यतमाभावादिति भावना । अथवा 'निष्कारणावरण' इति अकारणमेव अन्यतरोपयोगकालेऽन्यतरस्यावरण, तथा च सति सर्वदैव भावाभावप्रसङ्गः, तथा चोक्तम् 'नित्य सत्त्वमसत्त्व वा, हेतोरन्यानपेक्षणात्। अपेक्षातो हि भावानां, कादाचित्कत्वसंभव ॥१॥' इति गाथार्थ । तह य असव्वन्नुत्त, असव्व दरिसणप्पसगो य। एगतरोवयोगे, जिणस्स दोसा वहुविहा य ॥ ५ ॥" व्याख्या तथा च सति असर्वज्ञत्वम् असर्वदर्शित्व-प्रसगश्च पाक्षिक वाऽसर्वज्ञत्व यदा सर्वज्ञो न तदा सर्वदर्शी दर्शनोपयोगाभावात्, एव यदा सर्वदर्शी न तदा सर्वज्ञ ज्ञानो-पयोगाभावात्, एवमेकान्तरोपयोगेऽभ्युपगम्यमाने सति 'जिनस्य' केवलिन दोषा बहुविधा इति गाथार्थ । एव परेणोक्ते सति आगमवाद्याह 'भण्णति भिन्नमुहुत्तोवयोगकालेऽवि तो तिनाणिस्स। मिच्छा छावट्ठी सागरोवमाइ खओवसमो ॥ ६ ॥' व्याख्या यदुक्तमितरथाऽऽदिनिधनत्वमिति तदसदिति दर्शयति उपयोगानुपयोगकालापेक्षयैव साद्यपर्यवसितत्वात्केवलज्ञान दर्शनयोरित्यभिप्राय, न चानार्षमिद, कथ? भण्यते अन्यथा हि भिन्नमुहूर्त्तोपयोगकालेऽपि मत्यादीनां ततस्त्रिज्ञानिन मिथ्या षट्षष्टिसागरोपमाणि क्षयोपशम, प्रतिपादितश्च सूत्रे, न च युगपदेव मत्याद्युपयोग, एव क्षायिकोपयोगोऽपि भविष्यति जावस्वाभाव्यादिति गाथाभिप्राय । न च क्षयकार्येण अवश्यमनवरतमेव भवितव्यमिति दर्शयन्नाह 'अह नवि एव ता सुण जहेव खीणतरायओ अरहा। सतेऽवि अतराय क्खयम्मि पचप्पगारम्मि ॥ ७ ॥ सतत न देति लहति व, भुजति उवभुजई व सव्वण्णू। कज्जम्मि देति लभति व, भुजति य तहेव इहइ पि ॥ ८ ॥' किंच 'दितस्स लभतस्स य, भुजतस्स य जिणस्स

एस गुणो । खीणंतरायथत्ते, जं से विग्घं न संभवइ ॥ उवउत्तस्सेमेव य, नाणम्मि व दंसणम्मि व जिणस्स । खीणावरणगुणोऽयं
जं कसिणं मुणइ पासइ अ ॥ १० ॥ पासंतोऽवि न जाणइ, जाणं व न पासई, जइ जिणिंदो । एवं न कयाइ वि सो, सव्व-
ण्णू सव्वदरिसी य ॥ ११ ॥' व्याख्या- पश्यन्नपि न जानाति, जानन् वा न पश्यति यदि जिनेन्द्रः, एवं न कदाचिदप्यसौ
सर्वज्ञः सर्वदर्शी वा युगपदन्यतरोपयोगकालेऽन्यतरोपयोगाभावात् इति गाथार्थः । सिद्धान्तवाद्याह- 'जुगवमजाणंतोऽवि हु,
चउहि वि नाणेहि जह व चउनाणी । भन्नइ तहेव अरहा, सव्वन्नू सव्वदरिसी य ॥ १२ ॥' इयं तु निगदसिद्धा एव, नवरं
क्षायिकभावमाश्रित्येति गाथार्थः । पुनरप्याह-तुल्ले उभयावरण-क्खयम्मि पुव्वं समुब्भवो कस्स । दुविहुवयोगाभावे, जिणस्स
जुगवं ति चोएइ ॥ १३ ॥ व्याख्या-तुल्ये उभयावरणक्षये--केवलज्ञानदर्शनावरणक्षये पूर्वतरं-प्रथमतरमुद्भव-उत्पादः कस्य ?
यदि ज्ञानस्य स किंनिबन्धनः ? इति वाच्यं, तदावरणक्षयनिबन्धन इति चेत् दर्शनेऽपि तुल्य इति तस्याप्युद्भव-
प्रसंगः, एवं दर्शनेऽपि वाच्यम्, अतः स्वावरणक्षयेऽपि दर्शनाभाववत् ज्ञानस्याप्यभावप्रसंगः विपर्ययो वा, एवंविधोपयोगा-
भावे जिनस्य युगपदिति चोदयत्ययं गाथार्थः । अत्र सिद्धान्तवाद्याह- 'भन्नति ण एस नियमो, जुगवुप्पण्णेण जुगवमेवेह ।
होयव्वं उवयोगेण, एत्थ सुण ताव दिट्ठतं ॥ १४ ॥ जह जुगवुप्पत्तीएऽवि, सुत्ते सम्मत्तमइसुयाईणं । नत्थि जुगवोवओगो,
सव्वेसु तहेव केवलिणो ॥ १५ ॥ भणियं चिय पण्णत्ती-पण्णवणाईसु जह जिणो समयं । जं जाणइ न वि पासइ, तं अणुरय-
णप्पभादीणं ॥ १३ ॥' इदं गाथात्रयमपि प्रकटार्थम् । अधुना ये केवलज्ञानदर्शनाभेदवादिनस्तन्मतमुपन्यस्यन्नाह-'जह किर
खीणावरणे, देसन्नाणाण संभवो न जिणे । उभयावरणातीते, तह केवलदंसणस्सा वि ॥ १७ ॥' निगदसिद्धा । सिद्धान्त-

गाथाः 'दंसणमोग्गहमेत्तं, जइ कउगामणमंतरो मणिओ । दंसणनाणविगम, तह केवलदंसणं होउ ॥ १८ ॥ अह दंसणाण दंसण विगम गय केवलं मय नाय । न मा कालदंसण मिच्छामिणं नणु जेद ॥ १९ ॥ मभइ नइ ओहिनाणा, नाणइ पासइ य भासिणं गुणे । न य णाम ओहिदंसण-णाणेगत्तं तह इमं पि ॥ २० ॥ जइ पासइ तह पाणत्तु, पासइ जेणेह दंसणं त ने । नाणइ जं पीहा, व मे नाण ति घेतव्व ॥ २१ ॥' इत्यभेदसमर्थनार्थेव सिद्धान्तगाथाह 'नाणम्मि दंसणम्मि य, एत्तो एगतरयम्मि उवउत्तो । सव्वस्स केवलिस्सा, जुगवं दो नत्थि उवओगा ॥ २२ ॥ उवओगो एगयरो, पणुवीसं तिम सो सिणायस्स । भणिओ वियडत्थो चिय छउमत्थे विसेसेण ॥ २३ ॥' गाथाद्वयमपि निगदसिद्धं, नवरं भगवत्यां पंचविंशतितमे शतेऽधिकारात्पनथित 'सिणायस्स णि' त्यादारभ्य इत्यलिन सिद्धान्तगाथायामुद्धतत्वामागमभक्ति च पर्यो गम्भीरयथाह 'कस्स व नाणुमयमिणं, जिणस्स जदि होज्ज दोऽवि उवओगा । णूणं ण होति जुगवं, जेण णिसिद्धा सुवे बहुसो ॥ २४ ॥ निगदसिद्धैवेत्यलं प्रसंगेन । प्रकृतं प्रस्तुमः - 'अह' गाहा- इह मन पर्यायज्ञानानन्तरं मूलकमारेणव तुदि सामान्यं प्राकृतन्यायानुक्तं तद्रूप पश्चात् इत्यवसायर्थोऽथशब्दः, उक्तं च 'अथशब्दः प्रक्रियाप्रधानन्तर्यमंगलोपन्यास प्रतिवचनसमुच्चयेषु' । सर्वाणि च तानि द्रव्याणि च सर्वद्रव्याणि जीवाजीवलक्षणानि, तेषां परिणामाः प्रयोगविस्रसोभयाभ्या उत्पादादयः सर्वद्रव्यपरिणामाः, तेषां भावः सत्ता स्वलक्षणमित्यनर्थान्तरं, तस्य विशेषेण ज्ञापनं विज्ञप्तिर्विज्ञानं वा विज्ञप्तिः तत्र भेदापन्नाराणस्या विजते परिच्छित्ते. कारणं सर्वद्रव्यपरिणामभावविज्ञप्तिकारणं, अथवा विज्ञप्तिरेव कारणं विज्ञप्तिकारणम्, एवं च सत्यर्थस्यालोचनं रूपेणादीनामपि द्रव्यत्वात्, तन्न श्रयानन्तरादनन्तं । तथाऽऽद्यान्तामत

या हि यावतां योग्य इति, तत्र केवलज्ञानोपलब्धार्थाभिधायक शब्दराशि प्रोच्यमानस्तस्य भगवतो वाग्योग एव भवति, न श्रुत, नामकर्मादयनिबन्धनत्वात्, श्रुतस्य च क्षायोपशमिकत्वात्, स च श्रुत भवति शेष, शेषमित्यप्रधानम्, एतदुक्त भवति श्रोतॄणा श्रुतग्रन्थानुसारिभावश्रुतनिबन्धनत्वाच्छेषमप्रधान द्रव्यश्रुतमित्यर्थ अन्ये त्वेव पठन्ति–' वइजोग सुय हवइ तेसिं ' स वाग्योग श्रुत भवति तेषां श्रोतॄणा भावश्रुतकारणत्वादित्यभिप्राय । अथवा वाग्योग श्रुत द्रव्यश्रुतमेवेति गाथार्थ ॥ मे तमित्यादि निगमन तदेतत्केवलज्ञानम् । तदेतत्प्रत्यक्षम् ॥

एव प्रत्यक्षे प्रतिपादिते सति परोक्षस्वरूपमनवगच्छन्नाह–चोदक —

से कि त परुक्खनाण ? परुक्खनाण दुविह पन्नत्त, त जहा–आभिणिवोहियनाणपरोक्ख च सुअनाणपरोक्ख च जत्थ आभिणिवोहियनाण तत्थ सुयनाण, जत्थ सुयनाण तत्थाभिणिवोहियनाण, दोऽवि एयाइ अण्णमण्णमणुगयाइ, तहवि पुण इत्थ आयरिया नाणत्त पण्णवयति–अभिनिबुज्झइ त्ति आभिणिवोहिअनाण, सुणेइ त्ति सुय, मइपुव्व जेण सुअ न मई सुअपुव्विआ (सू० २४)

चूर्णि —अक्खा इदियमणा परा तेसु ज णाण त परोक्ख, मतिश्रुते परोक्षम् आत्मन परनिमित्तत्वात् अनुमानवत् । णणु सुत्ते इदियपच्चक्ख भणित ? उच्यते सच्चमिण, एत्थ ज इदियमणेहिं बहिलिंगपच्चयमुप्पज्जति तमेगतेणेव इदियाण अत्तणो य परोक्ख अणुमाणवणतो धूमाओ अग्गिणाण व, ज पुण अक्खा इदियमणो निमित्त त तेसिं चेव पच्चक्ख अलिं

गत्तणतो अत्तणो अवधिमादिव्व, अत्तणो तु तं एगंतेणेव परोक्खं इंदियाणं पि तं संववहारतो पच्चक्खं, ण परमत्थतो, कम्हा ? जम्हा दव्विंदिया अचेतणा इति । तं दुविहं–मतिणाणं सुतनाणं च, । इह मतिसुतनाणपुव्वण्णासकमे कारणं पुव्वुत्तं दट्ठव्वं । मतिसुताण य अभेदसामिणिरूवणत्थं इमं सुत्त–'जत्थ मतिनाणे'त्यादि, जत्थ त्ति पुरिसे जत्थ वा इंदियनोइंदियखयोवसमे मतिणाणमत्थि तत्थेव सुतनाणं पि, अहवा जत्थाभिनिबोधियसरूवं तत्थेव सुतं पि नियमा अण्णोण्णाणुगता भवंतेते आह-मतिसुताणं अण्णोण्णाणुगतत्तणतो सामिकालकारणखयोवसमतुल्लत्तणतो य एगत्तं पावति णो दुगपरिकप्पणंति, अत्रोच्यते-मतिसुताणं अण्णोण्णाणुगताण वि आयरिया भेदमाह दिट्ठंतसामत्थतो–जहा आगासपइट्ठिताणं धम्माधम्माणं अण्णोण्णाणुगताणं लक्खणभेदा भेदो दिट्ठो तहा मतिसुताण वि सामिकालादिअभेदेऽवि भेदो भण्णति–'अभिणिबुज्झती'त्यादि, एवं लक्खणविधाण भेदा भेदो तेसिं, अहवा इमो मतिसुतविसेसो–'मतिपुव्वयं सुतं ण मती सुतपुव्विया' इति, जतो सुतस्स मतिरेव पुव्वं कारणं, कहं? उच्यते–मतीए सुतं पाविज्जति ण मतिमंतरेण प्रापयितुं शक्यते, गहितं च मतीए पालिज्जाति, परिवत्तयतो णो पणस्सइ त्ति, जतो मती एवं सुतपुव्वा ण भवति, णणु सुतं पि सोतुं मती भवति, उच्यते–तं दव्वसुतं न भावश्रुतादित्यर्थः, अहवा मतिसुताण भेदकतो विसेसो–मतिणाणं अट्ठावीसइभेदभिण्णं, सुतणाणं पुण अंगानंगाइभेदभिण्णं अणेगहा, अहवा मतिसुताणं इंदियोवलद्धिविभागतो भेदो इमो–'सोतिंदियोवलद्धी' गाहा पूर्ववद्व्याख्येया, अहवा मतिसुतभेदं भणंति-'बुद्धि दिट्ठे' गाहा, एतीए गाहाए अत्थो मतिसुतविसेसो य जहा विसेसावस्सगे तहा भाणितव्वो। अण्णे वग्गसमं मतिणाणं सुंबसमं च सुतणाणं भणंति, तं च ण घडाति, जम्हा वग्गसुंबदिट्ठंतेणं मइनाणस्सेव सुतपरिणामो दंसिज्जति जम्हा तं ण

जुज्जते इत्यर्थः । अहवाऽण्णो मतिसुतभेदो अक्खराणुगत सुत अणक्खर मतिनाण ति । अहवाऽऽत्मप्रत्यायक मतिणाण, स्वपरप्रत्यायक सुतणाण । अहवा मतिसुताण आवरणभेदातो भेदो दिट्ठो तक्खतोवसमविसेसातो चेव मतिसुताण भेदो भवति भणितो मतिसुतविसेसो, इदाणिं जहा मतिसुतणाणाण कज्जकारणभेदेहिं भेदो दिट्ठो तहा मतीए सुतस्स य सम्मभिच्छविसेसदसणपरिग्गहातो भेदो इति अतो सुत भण्णति ॥

वृत्तिः—'से किं त' इत्यादि, अथ किं तद् परोक्ष ? परोक्ष द्विविध प्रज्ञप्त, तद्यथा—आभिनिबोधिकज्ञानपरोक्ष च श्रुतज्ञानपरोक्ष च, चौ पूर्ववत्, अनयोश्चेत्थ क्रमोपन्यासे प्रयोजनमुक्तमेव साम्प्रत स्वाम्यभेदप्रतिपादनायाह—'जत्थ आभिणिबोधियणाण' इत्यादि, यत्र पुरुषे इन्द्रियनोइन्द्रियक्षयोपशमे वा आभिनिबोधिकज्ञान तत्रैव पुरुषादौ श्रुतज्ञान, तथा यत्र श्रुतज्ञान, तत्राभिनिबोधिकज्ञानम् । आह—यत्राभिनिबोधिक ज्ञान तत्र श्रुतज्ञानमित्युक्ते यत्र श्रुतज्ञान तत्राभिनिबोधिक ज्ञानमिति गम्यत एवेत्यत किमनेनोक्तेनेति ? अत्रोच्यते—नियमतो न गम्यत इति, अतो नियमार्थ, तथा चाह—दोऽवि एयाइ' इत्यादि, द्वे अप्येते आभिनिबोधिकश्रुते अन्योऽन्यानुगते परस्पर प्रतिबद्धे । स्यादेतदेवं सत्यभेद एवास्त्वनयोरित्याशङ्क्याह 'तह वि पुणो' इत्यादि, तथापि पुनराचार्या नानात्व भेद प्रज्ञापयन्ति प्ररूपयन्ति, कथ ? लक्षणभेदात्, इहान्योऽन्यानुगतयोरप्येकाकाशस्थयोर्धर्माधर्मास्तिकाययोर्लक्षणभेदाद्भेद इति, तत्र यो हि गतिपरिणामपरिणतयोर्जीवपुद्गलयोर्गत्युपष्टम्भहेतुर्जलमिव झषस्य स खल्वसङ्ख्येयप्रदेशात्मकोऽमूर्तो धर्मास्तिकाय इति, तथा यः स्थितिपरिणामपरिणतयोर्जीवपुद्गलयोरेव स्थित्युपष्टम्भहेतुर्विवक्षया क्षितिरिव झषस्य स खल्वसङ्ख्येयप्रदेशात्मकोऽमूर्त एवाधर्मास्तिकाय इति, एवमा

परोक्षज्ञानम् मतिश्रुतयोर्भेदः

भिनिबोधिकश्रुतयोरपि लक्षणभेदाद्भेदः, तथा चाह—'अभिनिबुज्झइ' इत्यादि, अभिनिबुध्यत इत्याभिनिबोधिकम्-आत्मनः परिणामविशेषः एवं शृणोतीति श्रुतं-आत्मन एव परिणामविशेष इति, एतदुक्तं भवति-यदिन्द्रियमनोनिमित्तमात्मनो विज्ञानं श्रुतग्रन्थानुसारेणोपजायते तच्छ्रुतं, शेषमिन्द्रियमनोनिमित्तमाभिनिबोधिकमिति । इत्थं लक्षणभेदाद्भेदमभिधायाधुना प्रकारान्तरेण भेदमभिधित्सुराह-'मतिपुव्वं सुतं, ण मती सुयपुव्विया' "पॄ पालनपूरणयोः"इत्येतस्य पूर्यते प्राप्यते पाल्यते वाऽनेन कार्यमिति पूर्व—कारणं, मतिः पूर्वमस्येति मतिपूर्वं श्रुतं-श्रुतज्ञानं, तथा चेदं मत्या पूर्यते-प्राप्यते पाल्यते वा, अन्यथा प्रणश्यतीत्यर्थः । न मतिः श्रुतपूर्वेत्ययं महान् भेद इति । अत्राह-मतिश्रुतयोर्युगपदेव सम्यक्त्वावाप्तौ भाव उक्तः, अज्ञानयोरपि विगमः, तत्कथं मतिपूर्वं श्रुतमिति ? किं च मतिपूर्वकत्वेऽभ्युपगम्यमाने सति मतिज्ञानभावेऽपि तत्काले श्रुतमज्ञानं प्राप्नोति, अनार्षं चेदमिति, अत्रोच्यते-ननु लब्धिं प्रति मतिश्रुते समकाले भवतः, न तूपयोगोऽनयोः समकाले इति मतिपूर्वं श्रुतम्, इह पुनः को भावार्थः ? श्रुतोपयोगो मतिप्रभवः, यतो नासंचिन्त्य मत्या श्रुतग्रन्थानुसारिविज्ञानमुत्पद्यते । आह-एवं मतिरपि श्रुतपूर्वा भवत्येव, तथाहि-शब्दं श्रुत्वा या मतिरुत्पद्यते सा श्रुतपूर्वेति प्रतीतम्, अतो न विशेषो यथा मतिपूर्वं श्रुतं तथा मतिरपि श्रुतपूर्वेति, अत्रोच्यते-ननु सा द्रव्यश्रुतोद्भवा वर्तते, इह तु न मतिः श्रुतपूर्वेति का भावना ? भावश्रुतात् सकाशात् मतिर्नास्तीति, यद्वा कार्यतया निषिध्यते, न पुनः क्रमेण, क्रमेण तु श्रुतोपयोगाच्च्युतस्य मत्यवस्थानमिष्यत एवेत्यलं प्रसङ्गेन । न चैतत्स्वमनीषिकयोच्यते, यतोऽभ्यधायि भाष्यकृता-"णाणाणण्णाणाणि य, समकालाइं यतो मइसुयाइं । तो न सुयं मतिपुव्वं, मतिणाणे वा सुयऽण्णाणं ॥ १ ॥ ॥ ५२ ॥

इह लद्धिमइसुयाइ, समकालाइ न तूवयोगो सिं । मतिपुव्व सुयमिह पुण, सुतोवयोगो मतिप्पभवो ॥ २ ॥ सोऊण जा मती ते सुयपुव्व त्ति तेण ण विसेसो । सा दव्वसुयप्पभवा, भावसुयाओ मती नत्थि ॥ ३ ॥ कज्जतया ण तु कमसो, कमेण को वा मतिं निवारेइ । ज तत्थावत्थाण, चुतस्स सुत्तोवयोगातो ॥ ४ ॥ " इतश्च मतिश्रुतयोर्भेद , भेदभेदात्, तथाहि- अवग्रहादि-भेदादष्टाविंशतिविध मतिज्ञानम्, अङ्गप्रविष्टाद्यनेकभेदभिन्न च श्रुतज्ञानम्, इन्द्रियोपयोगलाभ (इन्द्रियलब्धिविभाग) तो वा, उक्त च 'सोइदियोवलद्धी, होइ सुय सेसय तु मतिणाण । मोत्तूण दव्वसुय, अक्खरलभो य सेससु ॥ १ ॥' इतश्च भेद , अनक्षरमपि मतिज्ञानम् अक्षरानुगत च श्रुतज्ञानमिति, अथवाऽऽत्मप्रत्यायक मतिज्ञान स्वपरप्रत्यायक श्रुतज्ञानमिति, आवरणभेदाच्च भेद इत्यलमतिप्रसगेन ॥

इह च यथा मतिश्रुतयो कार्यकारणभेदान्मिथो भेदस्तथा सम्यग्मिथ्यादर्शनपरिग्रहविशेषस्वरूपतोऽपि भेद इति दर्शयन्नाह-

अविसेसिया मई मइनाण च मइअन्नाण च, विसेसिया सम्मद्दिट्ठिस्स मई मइनाण, मिच्छद्दिट्ठिस्स मई मइअन्नाण । अविसेसिअ सुय सुयनाण च सुयअन्नाण च, विसेसिअ सुय सम्मद्दिट्ठिस्स सुय सुअनाण, मिच्छद्दिट्ठिस्स सुअ सुयअन्नाण (सू० २५)

चूर्णि —'अविसेसिता मती' त्यादि, सामिणा अविसेसिता मती इम वत्तव्वा 'आभिणिबोधिके' त्यादि, चसद्दो समुच्चये, 'विसेसिता मती' त्यादि, जदा पुण इमेण सामिणा विसेसिता मती भवति तदा इम वत्तव्वा 'सम्मद्दिट्ठिस्स मती' त्यादि, कण्ठ्यसिद्ध ।

'अविसेसितं सुय' मित्यादि, एतं पि उवउज्जिउं एवं चेव वत्तव्वं, अहवा जाव विसेसेण अविसेसिता मतीः ताव मती चेव वत्तव्वा, सच्चेव मती णाणण्णाणसद्दविसेसणतो इमं वत्तव्वा आभिनिबोधिकेत्यादि सूत्रसिद्धं, णाणण्णाणसद्दविसेसणं कहं ? भण्णति- सम्मत्तामिच्छसामिगुणत्तणतो सम्मद्दिट्ठिस्स मतीत्यादि सूत्रसिद्धं, सुतेऽवि एवं चेव वत्तव्वं। पर आह- तुल्लखयोवसमत्तणतो घडाइवत्थूण य सम्मपरिच्छेदत्तणतो सद्दादिविसयाण य समुवलंभातो कहं मिच्छदिट्ठिस्स मतिसुता अण्णाणं ति भणिता ? उच्यते- 'सदसदविसेसणातो, भवहेतुजहिच्छिओवलंभाओ। नाणफलाभावातो, मिच्छद्दिट्ठिस्स अण्णाणं ॥ १ ॥' मतिपुव्वं सुतं ति काउं मतिनाणं चेव पुव्वं भणामि ॥

वृत्तिः—'अविसेसिता' इत्यादि, अविशेषिता मतिः सामान्येनैव मतिज्ञानं मत्यज्ञानं च सामान्येनोभयत्रापि मतिशब्दप्रवृत्तेः। 'विशेषिता' इति स्वामिविशेषेण सम्यग्दृष्टेर्मतिः- मतिज्ञानं निश्चयनयदर्शनेन स्वकार्यप्रसाधकत्वात्। मिथ्यादृष्टेर्मतिः मत्यज्ञानं तत्त्वतः स्वफलरहितत्वादित्यर्थः। एवं श्रुतसूत्रमपि व्याख्येयम्। आह- क्षयोपशमादिकारणाभेदे घटादिपरिच्छेदकार्याभेदे च कथं मिथ्यादृष्टेरज्ञाने इति ? तथा च मिथ्यादृष्टेरपि क्षयोपशमादेव मतिश्रुतप्रवृत्तिः, तथोर्ध्वादिलक्षणाकारमेव घटादिसंवेदनमिति, अत्रोच्यते मिथ्यादृष्टेरज्ञाने मतिश्रुते सदसतोरविशेषादुन्मत्तकवत्, उक्तं च भाष्यकारेण- 'सदसदविसेसणातो, भवहेउजहिच्छिओवलंभाओ। णाणफलाभावातो, मिच्छद्दिट्ठिस्स अन्नाणं ॥ १ ॥' विनेयजनानुग्रहार्थमियं लेशतो व्याख्यायत इति- मिथ्यादृष्टिः कथंचित्सन्तमपि पुरुषे देवादिधर्मं न प्रतिपद्यते पुरुष एवेत्यभ्युपगमात्, तथाऽसन्तमपि घटादिधर्मं प्रतिपद्यते अस्त्येवेत्यभ्युपगमात्, अतः सदसतोराविशेष इत्यतश्च मिथ्यादृष्टेर्मतिश्रुते अज्ञाने भवहेतुत्वाच्च

मिथ्यादर्शनवत्, इतश्चावान यदृच्छोपलब्धेरुन्मत्तवत्, इतश्चाज्ञान फलाभावादन्धप्रदीपवत्, ज्ञानस्य हि फल विरति सा च मिथ्यादृष्टेर्न विद्यते इत्यल प्रसगेन । प्रकृत प्रस्तुम इह मतिपूर्व श्रुतमिति कृत्वा मतिज्ञानमेवाधिकृत्य प्रश्नसूत्रमाह—

सेकिंत आभिणिवोहिअनाण ? आभिणिवोहियनाण दुविह पन्नत्त, त जहा- सुयनिस्सिय च असुयनिस्सिअ च । सेकित असुअनिस्सिय ? असुअनिस्सिअ चउव्विह पन्नत्त, तजहा-उप्पत्तिआ १ वेणइआ २, कम्मया ३ परिणामिआ ४। बुद्धी चउव्विहा वुत्ता, पचमा णोवलब्भइ ॥५१॥ सू० २६

चूर्णि —'सेकिंत आभिणिबोधिके'त्यादि सुत्त, तत्थ 'सुतनिस्सित' ति, सुत ति सुत, त च सामाइयादिविंदुसारपज्जवसाण, एत दव्वसुत गहित, त अणुसरतो ज मतिणाणमुप्पज्जति त सुतणिस्साए उप्पण्णति सुतातो वा णिस्सित त सुतणिस्सित भण्णति, त च उग्गहेहावायधारणाठित चतु भेद । 'असुतणिस्सित च' त्ति ज पुण दव्वभावसुतणिरवेक्ख आभिणिबोधिकमुप्पज्जति त असुयभावतो समुप्पण्ण ति असुतनिस्सित भण्णति, त च उप्पत्तियादिबुद्धिचउक्क इम 'उप्पत्तिया' गाहा—

वृत्ति —'सेकिंत' इत्यादि, अत्र निर्वचन- द्विविध प्रज्ञप्त, तद्यथा- श्रुतनिश्रित चाश्रुतनिश्रित च, चौ पूर्ववत्, श्रुतमिह सामायिकादिलोकबिन्दुसारान्त द्रव्यश्रुत गृह्यते, तदनुसारेण श्रुतपरिकर्मितमतेस्तदपेक्षमेव चोत्पादकाले यदुत्पद्यते तच्छ्रुतनिश्रितमवग्रहादि, यत्पुनस्तदनपेक्ष तथाविधक्षयोपशमप्रभवमेव वर्तते तदश्रुतनिश्रितमौत्पत्तिक्यादि । आह इदमप्यवग्रहादिरूपमेव, सत्य, किंतु श्रुतानुसारमन्तरेणोत्पत्तेर्भेदेनोक्त । तत्राल्पतरवक्तव्यत्वादश्रुतनिश्रितमतिज्ञानप्रतिपादनायाह 'सेकिंत'

इत्यादि, 'उप्पत्तिया' गाहा, व्याख्या- उत्पत्तिरेव प्रयोजनं यस्याः सा औत्पत्तिकी, आह- क्षयोपशमः प्रयोजनमस्याः, सत्यं, किंतु स खल्वन्तरंगत्वात्सर्वबुद्धिसाधारण इति न विवक्ष्यते, न चान्यच्छास्त्रस्वकर्माभ्यासादिकमपेक्षत इति'। विनयो- गुरुशुश्रूषा स कारणमस्यास्तत्प्रधाना वा वैनयिकी। अनाचार्यकं कर्म, साचार्यकं शिल्पं, नित्यव्यापारः कर्म, कादाचित्कं शिल्पं कर्मजेति कर्मणो जाता कर्मजा परि-समन्तात् नमनं परिणामः सुदीर्घकालपूर्वापरार्थावलोकनादिजन्य आत्मधर्म इत्यर्थः स कारणमस्यास्तत्प्रधाना वा पारिणामिकी। बुध्यतेऽनयेति बुद्धिः मतिरित्यर्थः,सा चतुर्विधोक्ता तीर्थकरगणधरैः, किमिति? यस्मात् पंचमी नोपलभ्यते केवलिनाऽप्यसत्त्वादिति गाथार्थः। औत्पत्तिक्या लक्षणं प्रतिपादयन्नाह—

पुव्वं अदिट्ठमस्सुअ-मवेइयतक्खणविसुद्धगहिअत्था। अव्वाहयफलजोगा, बुद्धी उप्पत्तिआ नाम ॥ ६० ॥ भरहसिल १ पणिय २ रुक्खे ३, खुड्डग ४ पड ५ सरड ६ काय ७ उच्चारे ८। गय ९ घयण १० गोल ११ खंभे १२ खुड्डग १३ मग्गित्थि १४ पइ १५ पुत्ते १६ ॥ ६१ ॥ भरह १ सिल २ मिंढ ३ कुक्कुड ४, वालुअ ५ हत्थी ६ अगड ७ वणसंडे ८। पायस ९ अइया १० पत्ते ११, खाडहिला १२ पंच पिअरो अ १३ ॥ ६२ ॥ महुसित्थ १७ मुद्दि १८ अंके १९, नाणए २० भिक्खु २१ चेडगनिहाणे २२। सिक्खाय २३ अत्थसत्थे २४, इच्छा य महं २५ सयसहस्से २६ ॥ ६३ ॥

चूर्णिः—'पुव्वं' गाहा, 'भरह' गाहा, 'भरह' गाहा, 'मधु' गाहा, उप्पत्तिया गता, इमा वेणतिया—

वृत्ति —पूर्वमिति बुद्ध्युत्पादात् प्राक् स्वयमदृष्ट अन्यतश्चाश्रुत' अवेदितो मनसाऽप्यनालोचित' तस्मिन्नेव क्षणे विशुद्धो यथावस्थित गृहीतो ऽवधारित अर्थ अभिप्रेतपदार्थो यया सा तथा, इहैकान्तिकमिहपरलोकाविरुद्ध फलान्तरा बाधित चाव्याहतमुच्यते, फल प्रयोजनम् अव्याहत च तत्फल चाव्याहतफल, योगोऽस्या अस्तीति योगिनी, अव्याहतफलेन योगिनी अव्याहतफलयोगिनी, अन्ये पठन्ति 'अव्याहतफलयोगा' अव्याहतफलेन योगोऽस्या साऽव्याहतफलयोगा बुद्धि औत्पत्तिकी नामेति गाथार्थ ॥ ६० ॥ साम्प्रत विनेयजनानुग्रहायास्या एव स्वरूपप्रतिपादनार्थमुदाहरणानि प्रतिपादयन्नाह 'भरहसिल' गाहा, 'भरह' गाहा, 'महुसित्थ' गाहा, आसामर्थ कथानकेभ्य एवावसेय, तानि चावसरप्राप्तान्यपि गुरुनि योगाम्न ब्रूम, किं त्वावश्यके वक्ष्याम । अधुना वैनयिक्या लक्षण प्रतिपादयन्नाह—

भरनित्थरणसमत्था, तिवग्गसुत्तत्थगहिअपेआला । उभओ लोगफलवई, विणयसमुत्था हवइ बुद्धी ॥ ६४ ॥ निमित्ते १ अत्थसत्थे अ २, लेहे ३ गणिए अ ४ कूव ५ अस्से अ ६ । गद्दभ ७ लक्खण ८ गठी ९, अगए १० रहिए अ ११ गणिया य १२ ॥ ६५ ॥ सीया साडी दीह च, तण अवसव्वय च कुचस्स १३। निव्वोदए अ १४ गोणे, घोडगपडण च रुक्खाओ १५ ॥ ६६ ॥

चूर्णि —'भरनि' गाहा, 'निमित्ते' गाहा, 'सीता' गाहा । इमा कम्मइया—

वृत्ति —'भरनित्थ' गाहा इहातिगुरुकार्यदुर्निर्वहत्वाद्भर इव भरस्तन्निस्तरणे समर्था भरनिस्तरणसमर्था, त्रयो वर्गा-

त्रिवर्गमिति लोकरूढेर्धर्मार्थकामाः तदर्जनपरोपायप्रतिपादननिबन्धनं सूत्रं, तदन्वाख्यानं त्वर्थः, पेयालं- प्रमाणं सारो वा, त्रिवर्गसूत्रार्थयोर्गृहीतं प्रमाणं सारो वा यया सा तथाविधा। अथवा त्रिवर्गस्त्रैलोक्यम्। आह- त्रिवर्गसूत्रार्थगृहीतसारत्वे सत्यश्रुतनिश्रितत्वं विरुद्ध्यत इति, न हि श्रुताभ्यासमन्तरेण त्रिवर्गसूत्रार्थगृहीतसारत्वं संभवति, अत्रोच्यते- इह प्रायोवृत्ति-मंगीकृत्याश्रुतनिश्रितत्वमुक्तम्, अतः स्वल्पश्रुतनिश्रितभावेऽपि न कश्चिद्दोष इति'उभयलोकफलवती' ऐहिकामुष्मिकफलवती' 'विनयसमुत्था' विनयोद्भवा भवति बुद्धिरिति गाथार्थः। अस्या एव विनेयजनानुग्रहार्थमुदाहरणैः स्वरूपमुपदर्शयन्नाह- 'निमित्ते' गाहा, 'सीआ' गाहा, गाथाद्वयार्थः कथानकेभ्य एवावसेयः, तानि चोत्तरत्र वक्ष्यामः॥ साम्प्रतं कर्मजाया बुद्धेर्लक्षणं प्रतिपादयन्नाह—

उवओगदिट्ठसारा, कम्मपसंगपरिघोलणविसाला। साहुक्कारफलवई, कम्मसमुत्था हवइ बुद्धी ॥ ६१ ॥ हेरण्णिए १ करिसए २ कोलिअ ३ डोवे अ ४ मुत्ति ५ घय ६ पवए ७। तुन्नाए ८ वड्ढई य ९ पूयइ १० घड ११ चित्तकारे अ १२ ॥ ६८ ॥

चूर्णिः— ' उवओग ' गाहा, ' हेरण्णि ' गाहा, कम्मइआ गता ॥ इमा पारिणामिया—

वृत्तिः— ' उवयोग० ' गाहा—उपयोजनमुपयोगः विवक्षिते कर्मणि मनसोऽभिनिवेशः, सारः--तस्यैव कर्मणः परमार्थः, उपयोगेन दृष्टः सारो ययेति समासः,अभिनिवेशोपलब्धकर्मपरमार्थेत्यर्थः, कर्मणि प्रसङ्गः-कर्मप्रसङ्गः प्रसङ्गोऽभ्यासः, परिघोलनं

गिचार, कर्मप्रसङ्गपरिघोलनाभ्या विशाला कर्मप्रसगपरिघोलननिशाला अभ्यासविचारविस्तीर्णेति भावार्थ । साधुकृतमिति सुष्टुकृतमिति विद्वद्भ्य प्रशसा-साधुकार', तेन फलवतीति समास, माधुकारेण वाऽशेषमपि फल यस्या सा तथा । ' कर्मसमुत्था ' कर्मोद्भवा भवति बुद्धिरिति गाथार्थ । अस्या अपि विनेयवर्गानुकम्पयोदाहरणै स्वरूपमुपदर्शयन्नाह ' हेरनिए ' गाहा, अस्या अप्यर्थ वक्ष्याम । साम्प्रत पारिणामिक्या लक्षण प्रतिपादयन्नाह—

अणुमाणहेउदिट्ठत-साहिआ वयविवागपरिणामा । हिअनिस्सेअसफलवई-बुद्धी परिणामिआ नाम ॥ ६९ ॥ अभए १ सिट्ठि २ कुमारे ३, देवी ४ उदिओदए हवइ राया ५ । साहू य नदिसेणे ६ धणदत्ते ७ सावग ८ अमच्चे ९ ॥ ७० ॥ समए १० अमच्चपुत्ते ११, चाणक्के १२ चेव थूलभद्दे अ १३ । नासिकसुदरिनदे १४, वइरे १५ परिणामबुद्धीए ॥ ७१ ॥ चलणाहण १६ आमडे १७, मणी अ १८ सप्पे अ १९ खग्गि २० थूभिदे २१ । परिणामियबुद्धीए, एवमाई उदाहरणा ॥ ७२ ॥ से त असुअनिस्सिय ॥

चूर्णि — ' अणुमाण ' गाहा, ' अभए ' गाहा, ' समए ' गाहा, ' चलण ' गाहा । एताओ सव्वाओ जहा णमोक्कारे तहा दट्ठव्वाओ ॥ इदाणि सुताणिस्सिय उग्गहाइय सवित्थर भण्णति—

वृत्तिः— 'अणुमाण' गाहा अनुमानहेतुदृष्टान्तैः साध्यमर्थं साधयतीति अनुमानहेतुदृष्टान्तसाधिका । इह लिङ्ग-ज्ञानमनुमानं स्वार्थमित्यर्थः, तत्प्रतिपादकं वचो हेतुः परार्थमित्यर्थः, अथवा ज्ञापकमनुमानं, कारको हेतुः, दृष्टमर्थमन्तं नय-तीति दृष्टान्तः । आह–अनुमानग्रहणादेव दृष्टान्तस्य गतत्वादलमुपन्यासेन, न, अनुमानस्य तत्त्वत एकलक्षणत्वात् उक्तं च–"अन्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम्" इत्यादि, साध्योपमाभूतश्च दृष्टान्तः, उक्तं च– "यः साध्यस्योपमाभूतः, स दृष्टान्त कथ्यते" इति कालकृतो देहावस्थाविशेषो वय इत्युच्यते तद्विपाकेन परिणामः पुष्टता यस्याः सा तथाविधा हितम्-अभ्युदयः तत्कारणं वा, निःश्रेयसं-मोक्षः तन्निबन्धनं वा, हितनिःश्रेयसाभ्यां फलवती बुद्धिः पारिणामिकी इति गाथार्थः । अस्या अपि शिष्यगणहितायोदाहरणैः स्वरूपं दर्शयन्नाह– 'अभए' गाहा, 'खमए' गाहा, 'चलणा' गाहा, आसामर्थः कथानकेभ्य एवावसेयः, तानि चान्यत्र वक्ष्यामः । से तमित्यादि तदेतदश्रुतनिश्रितम् ॥

से किं तं सुअनिस्सिअं? २ चउव्विहं पण्णत्तं, तं जहा–उग्गह १ ईहा २ अवायो ३ धारणा ४ (सू. २६)

चूर्णिः— इह सामण्णस्स रूवादिअसेसविसेसनिरवेक्खस्स आणिद्देसस्स अवग्रहणं अवग्रहः, तस्सेवत्थस्स विचारण-विसेसेणेहणमीहा, तस्स विसेसणविसिट्ठस्सत्थस्स अवसातोऽवायः तव्विसेसावगमइत्यर्थः, तव्विसेसावगमत्थस्स धरणं–अवि-चुती धारणा इत्यर्थः ॥

वृत्ति —' से किं त ' इत्यादि, चतुर्विध प्रज्ञप्त, तद्यथा अवग्रह ईहा अपायो धारणा । इह अवग्रहणमवग्रह सामान्य-मात्रानिर्दिश्यार्थग्रहणमित्यर्थ. । तथा ईहनमीहा सदर्थपर्यालोचनचेष्टेत्यर्थ , एतदुक्त भवति-अवग्रहादुत्तीर्णः अपायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेपत्यागाभिमुखश्च प्रायो मधुरत्वादय शङ्खादिशब्दधर्मा अत्र घटन्ते, न खरकर्कशनिष्ठुरतादय शार्ङ्गादिशब्दधर्मा इति मतिविशेष ईहा इति । तथा तदर्थाध्यवसायोऽपाय निर्णयो निश्चयोऽवगम इत्यनर्थान्तरम्, एतदुक्त भवति शाङ्ख एवाय शार्ङ्ग एव वेत्याद्यवधारणात्मक प्रत्ययोऽपाय, इति । तथा तदर्थविशेष धरण धारणा अविच्युतिस्मृतिवासनारूपा ॥

से किं त उग्गहे ? उग्गहे दुविहे पण्णत्ते, त जहा-अत्थुग्गहे अ वंजणुग्गहे अ (सू०२७)

चूर्णि — तत्थ उग्गहो दुविहो—अत्थोग्गहो वंजणउग्गहो य एत्थ वंजणोग्गहस्स पच्छाणुपुव्वितो अत्थोग्गहातो वा पुव्व वंजणउग्गहो भवइ त्ति वंजणोग्गहमेव पुव्व भणामि—

वृत्ति — ' से किं त ' इत्यादि, अथ कोऽयमवग्रह ? अवग्रहो द्विविध प्रज्ञप्त', तद्यथा-अर्थावग्रहश्च व्यञ्जनावग्रहश्च अभ्यत इत्यर्थ , अर्थस्यावग्रहोऽर्थावग्रह सकलविशेषनिरपेक्षानिर्देश्यार्थग्रहणमेकसामयिकमिति भावार्थ । व्यज्यतेऽनेन अर्थ. प्रदीपेनेव घट इति व्यञ्जन, तच्चोपकरणेन्द्रिय शब्दादिपरिणतद्रव्यसघातो वा ततश्च व्यञ्जनेनोपकरणेन्द्रियेण व्यञ्जनाना शब्दादिपरिणतद्रव्याणामवग्रहो व्यञ्जनावग्रह । अथार्थावग्रहस्य तु लक्ष्यत्वात्सकलेन्द्रियार्थव्यापकत्वाच्च प्रथम-मुपन्याम , ततो दुर्लक्ष्यत्वात्सकलेन्द्रियार्थाव्यापकत्वाच्चेतरस्य ॥

से किं तं वंजणुग्गहे ? वंजणुग्गहे चउव्विहे पण्णत्ते, तं जहा सोइंदियवंजणुग्गहे घाणिंदियवंजणुग्गहे जिब्भिदियवंजणुग्गहे फासिंदियवंजणुग्गहे । से तं वंजणुग्गहे (सू० २८)

चूर्णिः— वंजणाणं अवग्गहो वंजणोवग्गहो, एत्थ वंजणग्गहणेण सद्दादिपरिणता दव्वा घेतव्वा, वंजणे अवग्गहो, एत्थ वंजणग्गहणेण दव्विंदियं घेतव्वं, एतेसिं दोण्ह वि समासाणं इमो अत्थो जेण करणभूतेण अत्थो वंजिज्जइ तं वंजणं जहा पदीवेण घडो, एवं सद्दादिपरिणतेहिं दव्वेहिं उवकरणिंदियपत्तेहिं चित्तेहिं संबद्धेहिं संपराक्तेहिं जम्हा अत्थो वंजिज्जइ त्ति तम्हा ते दव्वा वंजणावग्गहो भण्णति, एस वंजणावग्गहो सुतसिद्धो चउव्विहो ॥

वृत्तिः— ' से किं तं ' इत्यादि, अथ कोऽयं व्यञ्जनावग्रहः? इत्यत्र पुनरुत्पत्तिक्रम एवाश्रितो यथासंभवमिति सुश्लिष्टमेतदिति, प्रकृतमुच्यते--व्यंजनावग्रहश्चतुर्विधः प्रज्ञप्तः, तद्यथा--श्रोत्रेन्द्रियव्यञ्जनावग्रह इत्यादि सूत्रसिद्धम् । आह--पञ्चेन्द्रियमनःसद्भावे सति किमित्ययं चतुर्विधः ? अत्रोच्यते- नयनमनसोरप्राप्तकारित्वात्, अप्राप्तकारित्वं च विषयकृतानुग्रहोपघातशून्यत्वात्, प्राप्तकारित्वे पुनरनलजलशूलाद्यालोकने दहनक्लेदनपाटनादयः स्युः, अत्र च विषयदेशं गत्वा न पश्यति प्राप्तं चार्थं नालम्बते इत्येतावान्निगम्यते, मूर्तिमता पुनः प्राप्तेन भवत एवानुग्रहोपघातौ भास्कराकिरणादिनेति, अन्यस्त्वाह-व्यवहितार्थानुपलब्धेरनुमानात्प्राप्तकारित्वं लोचनस्येति, एतदयुक्तम् , अनैकान्तिकत्वात्,स्नोऽभ्रपटलस्फटिकान्तरितोपलब्धेः, स्यादेतत् नायना रश्मयो निर्गत्य तमर्थं गृह्णन्तीति दर्शने रश्मीनां तैजसत्वात्तेजोद्रव्यैरप्रतिस्खलनाददोष इति, एतदप्ययुक्तम् , महाज्वालादौ प्रतिस्खलनोपलब्धेरिति, अत्र बहु वक्तव्यं, तत्तु नोच्यते, ग्रन्थविस्तरभयात् ,गमनिकामात्रमेतदिति ॥

सेकित अत्थुग्गहे ? अत्थुग्गहे छव्विहे पण्णत्ते, तजहा- सोइदियअत्थुग्गहे चक्खिदियअत्थुग्गहे घाणिदिअअत्थुग्गहे जिब्भिदियअत्थुग्गहे फासिदियअत्थुग्गहे नोइदियअत्थुग्गहे (सू० २९)

चूर्णि —'सेकित्त अत्थोग्गहे' इत्यादि सूत्र। अत्थस्स उग्गहो अत्थोग्गहो, सो य वजणावग्गहातो चरिमसमयाणतर एकसमय अविसिट्ठसव्विदियविसय गेह्णतो अत्थावग्गहो भवति, चक्खिदियस्स मणसो य वजणाभावे पढम चेव ज अवसिट्ठ मत्थग्गहणकाले यो एगसमय सो अत्थोग्गहो भाणितव्वो सव्वोवि सो विभागेण छव्विहो दरिसिज्जति, ण पुण तस्सोग्गहस्स काले सद्दादिविसेसबुद्धी अत्थि, णोइदियो त्ति मणो,सो य दुविहो दव्वमणो य,भावमणो य तत्थ मणपज्जत्तिणामकम्मुदयातो तज्जोग्गे मणोदव्वे घेत्तु मणजोगपरिणामिता दव्वा दव्वमणा भण्णति, जीवो पुण मणणपरिणामकक्रियावण्णो भावमणो एस उभयरूवो मणदव्वालवणो जीवस्स णाणव्वावारो भावमणो भण्णति, तस्स जो उवकरणिंदियदुवारनिरवेक्खो घडाइअत्थ सरूवचिंतणपरो बोधो उप्पज्जति सो णोइदियत्थावग्गहो भवति ॥

वृत्ति —'सेकिंत' इत्यादि, अथ कोऽयमर्थावग्रह ? अर्थावग्रह षड्विध प्रज्ञप्त, तद्यथा श्रोत्रेन्द्रियार्थावग्रह इत्यादि सूत्रसिद्ध यावत् 'तस्स ण इमे' इत्यादि॥

तस्स ण इमे एगट्ठिआ नाणाघोसा नानावजणा पच नामधिज्जा भवति, त जहा- ओगेण्हणया उवधारणया सवणया अवलवणया मेहा। से त उग्गहे (सू० ३०)

चूर्णिः—'घोस'त्ति उदत्तादिया सरविसेसो घोसा भण्णंति, 'वंजणं' ति अभिलावक्खरा तेसि इमे एगट्ठिया पंच 'ओगिण्हणता' इत्यादि, एते ओग्गहसामण्णतो पंच वि णियमा एगट्ठिता, उग्गहविभागे पुण कज्जमाणे उग्गहविभागंसेण भिण्णत्था भवंति, सो य उग्गहो तिविहो- विसेसावग्गहो सामण्णत्थावग्गहो विसेससामण्णत्थावग्गहो य, एगट्ठियाण इमो भिण्णत्थो वंजणोग्गहस्स पढमसमयपविट्ठपोग्गलाण गहणता ओगिण्हणता भण्णति आइल्ले त्ति काउं, वितियादिसमयादिसु जाव वंजणोग्गहो ताव उवधारणता भण्णति, एगसामइगसामण्णत्थावग्गहकाले सवणता भण्णति, विसेससामण्णत्थावग्गहकाले अवलंबणता भण्णति, उत्तरुत्तरविसेससामण्णत्थावग्गहेसु जाव मेहया धावति ताव मेधा भण्णइ, जत्थ वंजणावग्गहो नत्थि तत्थ सवणादिया तिण्णि एगट्ठिता भण्णंति, आह- णणु भिण्णत्थदंसणे एगट्ठितत्ति विरुद्धं, उच्यते- ण विरुद्धं, जतो सव्वविकप्पेसु उग्गहस्सेव सरूवं दंसिज्जति ॥

वृत्तिः—तस्यावग्रहस्यामूनि वक्ष्यमाणानि. णं पूर्ववत्, अवग्रहसामान्यापेक्षया एकार्थिकानि नानाघोषाणि नानाव्यंजनानि पंच नामधेयानि भवन्ति । घोषा- उदात्तादयः, कादीनि व्यंजनानि, नामैव नामधेयम्, अवग्रहविशेषापेक्षया तु कथंचिद्भिन्नार्थानि । त्रिविधश्चावग्रहः सामान्यावग्रहः विशेषावग्रहः विशेषसामान्यार्थावग्रहश्च, तत्र भिन्नार्थता निदर्श्यते तं जहा- 'ओगिण्हणता' इत्यादि अवगृह्यतेऽनेनेति अवग्रहणं, 'करणे ल्युट्' व्यंजनावग्रहप्रथमसमयप्रविष्टशब्दादिद्रव्यादानपरिणाम इत्यर्थः तद्भावः अवग्रहणता । धार्यतेऽनेनेति धारणं, उप-सामीप्येन धारणमुपधारणं व्यंजनावग्रहद्वयादिसमयेष्वनुसमा-नान्तं प्रतिसमयमेव शब्दादिद्रव्यादानधारणपरिणाम इति भावना, तद्भाव उपधारणता । श्रूयतेऽनेनेति श्रवणम् एकसामयिक-

सामान्यार्थावग्रहावबोधपरिणाम इत्युक्तं भवति, तद्भावः श्रवणता। अवलम्ब्यत इत्यवलम्बन "कृत्यल्युटो बहुलम्" (पा० ३-३ ११३) इति वचनात् कर्मणि ल्युट्, तद्भाव' अवलम्बनता विशेषसामान्यार्थावग्रह इति भावार्थः, तथाहि-उत्तरोत्तरधर्मजिज्ञासायां सत्यां शब्दादिज्ञानमेवावलम्ब्येहादय' प्रवर्तन्ते किमय शाङ्ख किं वा शार्ङ्ग इति, अतस्तदनन्तर-मेवेहादिप्रवृत्तेर्विशेषसामान्यार्थावग्रहोऽवलम्बनमिति। एवमुत्तरोत्तरधर्मजिज्ञासायां सत्यां विशेषसामान्यार्थावग्रहेषु मर्यादया धावतो मेधोच्यते यावदधिगच्छति यथा शाङ्खः स किं मन्द्रः ? किं वा तारः ? इत्यादि, यत्र व्यञ्जनावग्रहो नास्ति तत्राद्यभेदद्वयाभाव इति। 'से त उग्गहे' सोऽयमवग्रह' ॥

से किं त ईहा ? ईहा छव्विहा पण्णत्ता, तं जहा-सोइंदियईहा चक्खिंदियईहा घाणिंदिअईहा जिब्भिदिअईहा फासिंदिअईहा नोइंदिअईहा। तीसे ण इमे एगट्ठिआ नाणाघोसा नाणावंजणा पंच नामधिज्जा भवंति, त जहा-आभोगणया मग्गणया गवेसणया चिंता विमंसा। से त ईहा॥ (सू० ३१)

चूर्णि —इदाणिं उग्गहसमणंतरं ईहा, सा छव्विहा सुत्तसिद्धा। इमे तस्सेगट्ठिता, तेवि ईहासामण्णतो एगट्ठिता चेव, अत्थविकप्पणतो पुणभिण्णत्था इमेण विधिणा-'आभोयणता' इच्चादि, उग्गहसमयाणंतरं सब्भूतविसेसत्थाभिमुहमालोयणं आभोयणता भण्णति, तस्सेव विसेसत्थस्स अण्णयवइरेगधम्मसमालोयणं मग्गणा भण्णति, तस्सेवत्थस्स वइरेगधम्मपरिच्चाओ अण्णयधम्मसमालोयण च गवेसणता भण्णति, तस्सेव तद्धम्माणुगतत्थस्स पुणो पुणो समालोयणत्तेण चिंता भण्णति,

तमेवत्थं णिच्चाणिच्चादिएहिं दव्वभावेहिं विमरिसता वीमंसा भण्णति । एवं बहुधा अत्थमालोगतं तस्स उक्कोसतो अंतमुहुत्तकालं सव्वा ईहा भवति ॥

वृत्तिः—'से किं तं' इत्यादि सूत्रं निगदसिद्धं यावत् आभोगनता ईहा, अर्थावग्रहसमयसमनन्तरमेव सद्भूतार्थविशेषाभिमुखमालोचनमाभोगनमुच्यते, तद्भाव आभोगनता । मृग्यतेऽनेन परिणामकरणेनेति मार्गणं सद्भूतार्थविशेषाभिमुखमेव तदूर्ध्वमन्वयव्यतिरेकधर्मान्वेषणमिति हृदयं, तद्भावो मार्गणता, एवम् अन्विष्यते गवेष्यतेऽनेनेति गवेषणं, तत ऊर्ध्वं सद्भूतार्थविशेषाभिमुखमेव व्यतिरेकधर्मपरित्यागतोऽन्वयधर्माध्यासेनालोचनमिति गर्भः, तद्भावो गवेषणता, ततो मुहुर्मुहुः क्षयोपशमविशेषतः स्वधर्मानुगतसद्भूतार्थविशेषचिन्तनं चिन्ता, विमर्षणं विमर्षः क्षयोपशमविशेषादेवोर्ध्वं स्पष्टतरावबोधतः सद्भूतार्थविशेषाभिमुखमेव व्यतिरेकधर्मपरित्यागतोऽन्वयधर्मालोचनं विमर्शः, नित्यानित्यादिद्रव्यभावालोचनमित्यन्ये । से तं ईहा ॥

से किं तं अवाए? अवाए छव्विहे पण्णत्ते, तं जहा--सोइंदिअअवाए चक्खिंदिअअवाए घाणिंदिअअवाए जिब्भिंदिअअवाए फासिंदिअअवाए नोइंदिअअवाए तस्स णं इमे एगट्ठिआ नाणाघोसा नाणावंजणा पंच नामधिज्जा भवंति, तं जहा--आउट्टणया पच्चाउट्टणया अवाए बुद्धी विण्णाणे । से तं अवाए ॥ (सू० ३२)

चूर्णि —ईहाणतर अत्तातो, सो छव्विहो सुत्तसिद्धो, तस्सेगट्ठिता इमे पच, ते य अवायसामण्णत्तणतो णियमा एगट्ठिता चेव, अभिधाणभिण्णत्तणतो पुण भिण्णत्था। इमेण विधिणा ' आउट्टणता ' इत्यादि, ईहणभावनियट्टस्स अत्थसरूवपडिबोधबुद्धस य परिच्छेदमुप्पादतस्स आउट्टणता भण्णति , इहणभावनियट्टस्स वि तमत्थमालोयतस्स पुणो पुणो णियट्टण पच्चाउट्टण भण्णाति। सव्वहा ईहाए अवणयण कातु अवधारणावधारितत्थस्स अवधारयतो अवातोत्ति भण्णइ। पुणो पुणो तमत्थाव धारणावधारित बुज्झतो बुद्धी भवइ। तम्मि चेवावधारितमत्थे विसेसे पेरकतो अवधारयतो य विण्णाणे त्ति भण्णति ॥

वृत्ति —' से किं त ' इत्यादि सूत्रसिद्ध यावत् आवर्तनता, वर्त्यतेऽनेनेति वर्तन क्षयोपशमकरणमेव ईहाभावानिवृत्त्यभिमुखस्यापायभावप्रतिपत्त्यभिमुखस्य चार्थविशेषाववोधविशेषस्य आ-मर्यादया वर्तनमावर्तन, तद्भाव आवर्तनता। ततः प्रतिपमावर्तन प्रत्यावर्तनम् अर्थविशेष एव विवक्षितापायप्रत्यासन्नतरवोधविशेषाणां मुहुर्मुहुर्वर्तनमित्यर्थ , तद्भाव. प्रत्यावर्तनता। अप अय अपाय विशेषत सङ्कलनेन निश्चयो निर्णयोऽवगम इत्यनर्थान्तर, सर्वथेहाभावान्निवृत्तस्यावधारणावधारितमर्थमवगच्छतोऽपाय इति भावार्थः। ततस्तमेवावधारितमथ क्षयोपशमविशेषात् स्थिरतया पुन पुन स्पष्टतरमेव बुद्ध्यमानस्य बुद्धि । विशिष्ट ज्ञान विज्ञान क्षयोपशमविशेषादवधारितार्थविषयमेव तीव्रतरधारणाकारणमित्यर्थ । ' से त अवाए ' सोऽयमपाय' ॥

से कि त धारणा ? धारणा छव्विहा पण्णत्ता, त जहा-सोइदिअधारणा चक्खिदिअधारणा घाणिंदिअधारणा जिब्भिदिअधारणा फासिंदिअधारणा नोइंदिअधारणा। तीसे ण इमे एगट्ठिआ

नाणाघोसा नाणावंजणा पंच नामधिज्जा भवंति, तं जहा--धारणा साधारणा ठवणा पइट्ठा कोट्ठे । से तं धारणा ॥ (सू० ३३)

चूर्णिः—अवायाणंतरं धारणा, सा य छव्विहा सुत्तसिद्धा, तस्सेगट्ठिता पंच, ते य सामण्णधारणं पडुच्च णियमा एगट्ठिया, धारणत्थविकप्पणताए भिण्णत्था इमेण विधिणा--' धारणा ' इत्यादि, अवायाणंतरं तमत्थं अविच्चुतीए जहण्णुक्कोसेणं अंतमुहुत्तं धरेंतस्स धारणा भण्णाति, तमेव अत्थं अणुवयोगत्तणतोऽविच्चुतं जहण्णेणं अंतमुहुत्तातो परतो दिवसादिकालविभागेसु संभरतो य धारणा भण्णाति । ' ठवण ' त्ति ठावणा सा य अवायावधारियमत्थं पुव्वावरमालोइयं हितयम्मि ठावयंतस्स ठवणा इति भण्णाति पूर्णघटस्थापनावत् । 'पतिट्ठ' त्ति सोवि य अवधारितत्थो हितयम्मि प्रभेदेन पइट्ठावितमाणो पतिट्ठा भण्णाति जले उपलप्रक्षेपप्रतिष्ठावत् ।' कोट्ठे ' त्ति जहा कोट्ठगे सालिमादिबीया परिकत्ता अविनट्ठा धारिज्जंति तहा अवातावधारितमत्थं गुरूवादिट्ठं सुत्तमत्थं वा अविणट्ठं धारयतो धारणाकोट्ठगसमात्ति कातुं कोट्ठेति वत्तव्वा ॥

वृत्तिः—' से किं तं ' इत्यादि निगदासिद्धं यावद्धारणेत्यादि, अपायानन्तरमवगतार्थमविच्युत्या जघन्योत्कृष्टमन्तर्मुहूर्त्तमात्रं कालं धारयतो धारणेति भण्यते । ततस्तमेवार्थमुपयोगाच्युतं जघन्येनान्तर्मुहूर्तादुत्कृष्टतोऽसङ्ख्येयकालात् परतः स्मरतो धरणं धारणोच्यते । स्थापनं स्थापना, ततोऽपायावधारितमर्थं पूर्वापरालोचितं हृदि स्थापयतः स्थापना पूर्णघटस्थापनावत् वासनेत्यर्थः । अन्ये तु धारणास्थापनयोर्व्यत्ययेन स्वरूपमाचक्षते । प्रातिष्ठापनं प्रतिष्ठा अपायावधारित- ॥ ६० ॥

मेवार्थं हृदि प्रभेदेन प्रतिष्ठापयतः प्रतिष्ठा भण्यते जले उपलप्रक्षेपप्रतिष्ठावत् । ' कोष्ठक ' इति अविनष्टसूत्रार्थबीजधारणात् कोष्ठकवद्धारणा कोष्ठक इति । इहात्मनो नानस्वभावत्वाज्ज्ञानावरणीयादिकर्ममलपटलाच्छादितस्वभावत्वात् गुरुवदनसमुत्थशब्दाद्यनेकविधकारणापाद्यमानक्षयोपशमसामर्थ्यादवबोध , ज्ञेयस्य चानन्तधर्मात्मकत्वात्कालक्षयोपशमविशेषतोऽवग्रहेहापाया वबोधविशेषो भावनीय कथञ्चिदेकाधिकरणत्वात् अन्यथा परिच्छेदप्रवृत्तिलक्षणसकललोकप्रसिद्धसव्यवहारोच्छेदप्रसग इत्यल प्रसगेन, गमनिकामात्रमेतत् ॥ अवग्रहादिकालप्रमाण प्रतिपादयन्नाह—

उग्गहे इक्कसमइए, अतोमुहुत्तिया ईहा, अतोमुहुत्तिए अवाए, धारणा सखेज्ज वा काल असखेज्ज वा काल (सू० ३४) एव (इच्चेतस्स) अट्ठावीसइविहस्स आभिणिबोहियनाणस्स वजणुग्गहस्स परूवण करिस्सामि पडिबोहगदिट्ठतेण मल्लगदिट्ठतेण य । से किं त पडिबोहगदिट्ठतेण ? पडिबोहगदिट्ठतेण से जहानामए केइ पुरिसे कचि पुरिस सुत्त पडिबोहिज्जा अमुगा अमुग त्ति, तत्थ चोअगे पन्नवगं एव वयासी कि एग समयपविट्ठा पुग्गला गहणमागच्छति ? दुसमयपविट्ठा पुग्गला गहणमागच्छति? जाव दससमयपविट्ठा पुग्गला गहणमागच्छति? सखिज्जसमयपविट्ठा पुग्गला गहणमागच्छति ? असखिज्जसमयपविट्ठा पुग्गला गहणमागच्छति ? एव वदत चोअग पण्णवए एव वयासी–नो एगसमयपविट्ठा पुग्गला गहणमागच्छति, नो दुसमयपविट्ठा पुग्गला

गहणमागच्छंति, जाव नों दससमयपविट्ठा पुग्गला गहणमागच्छंति, नो संखिज्जसमयपविट्ठा पुग्गला गहणमागच्छंति, असंखिज्जसमयपविट्ठा पुग्गला गहणमागच्छंति, से तं पडिबोहगदिट्ठंतेणं। से किं तं मल्लगदिट्ठंतेणं? मल्लगदिट्ठंतेणं से जहा नामए केइ पुरिसे आवागसीसाओ मल्लगं गहाय तत्थेगं उदगबिंदुं पक्खेविज्जा, से नट्ठे, अण्णेऽवि पक्खित्ते सेऽवि नट्ठे, एवं पक्खिप्पमाणेसु २ होही से उदगबिंदू जे णं तं मल्लगं रावेहिइ त्ति, होही से उदगबिंदू जे णं तंसि मल्लगंसि ठाहिति होही से उदगबिंदू जे णं तं मल्लगं भरिहिति होही से उदगबिंदू जे णं तं मल्लगं पवाहेहिति, एवामेव पक्खिप्पमाणेहिं२ अणंतेहिं पुग्गलेहिं जाहे तं वंजणं पूरिअं होइ ताहे हुंति करेइ, नो चेव णं जाणइ केऽवि एस सद्दाइ ? तओ ईहं पविसइ, तओ जाणइ असुगे एस सद्दाइ, तओ अवायं पविसइ, तओ से उवगयं हवइ, तओ णं धारणं पविसइ, तओ णं धारेइ संखिज्जं वा कालं असंखिज्जं वा कालं, से जहा नामए केई पुरिसे अव्वत्तं सद्दं सुणिज्जा तेणं सद्दो त्ति उग्गहिए, नो चेव णं जाणइ के वेस सद्दाइ, तओ ईहं पविसइ, तओ जाणइ, अमुगे एस सद्दे, तओ णं अवायं पविसइ, तओ से उवगयं हवइ, तओ धारणं पविसइ, तओ णं धारेइ संखिज्जं वा कालं असंखेज्जं

वा काल। से जहा नामए केई पुरिसे अव्वत्त रूव पासिज्जा तेण रूव त्ति उग्गहिए, नो चेव ण जाणइ के वेस रूवात्ति, तओ ईह पविसइ, तओ जाणइ, अमुगे एस रूवे त्ति, तओ अवाय पविसइ, तओ से उवगय हवइ, तओ धारण पविसइ, तओ ण धारेइ, सखेज्ज वा काल अस-खिज्ज वा काल। से जहा नामए केई पुरिसे अव्वत्त गध अग्घाइज्जा, तेण गध त्ति उग्गहिए, नो चेव ण जाणइ के वेस गधे त्ति, तओ ईह पविसइ, तओ जाणइ असुगे एस गधे, तओ अवाय पविसइ, तओ से उवगय हवइ, तओ धारण पविसइ, तओ ण धारेइ सखेज्ज वा काल असखेज्ज वा काल। से जहा नामए केई पुरिसे अव्वत्त रस आसाइज्जा, तेण रसो त्ति उग्गहिए, नो चेव ण जाणइ के वेस रसेत्ति, तओ ईह पविसइ, तओ जाणइ असुगे एस रसे, तओ अवाय पविसइ, तओ से उवगय हवइ, तओ धारण पविसइ, तओ ण धारेइ सखिज्ज वा काल असखिज्ज वा काल। से जहा नामए केई पुरिसे अव्वत्त फास पडिसवेइज्जा, तेण फासे त्ति उग्गहिए नो चेव ण जाणइ के वेस फासओ त्ति, तओ ईह पविसइ, तओ जाणइ अमुगे एस फासे, तओ अवाय पविसइ, तओ से उवगय हवइ, तओ धारण पविसइ, तओ ण धारेइ सखेज्ज वा काल असखेज्ज

मल्लक-
दृष्टान्तः

वा कालं ! से जहा नामए केई पुरिसे अव्वत्तं सुमिणं पासिज्जा, तेणं सुमिणो त्ति उग्गहिए, नो चेव णं जाणइ के वेस सुमिणे त्ति, तओ ईहं पविसइ, तओ जाणइ अमुगे एस सुमिणे, तओ अवायं पविसइ, तओ से उवगयं होइ, तओ धारणं पविसइ, तओ धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं। से तं मल्लगदिट्ठंतेणं ॥ (सू० ३५)

चूर्णिः—'इच्चेतस्से'त्यादि सुत्तं, इतिः उपप्रदर्शने एतस्स ति जं अतिकंतं। अट्ठावीसातिभेदं, ते य के अट्ठावीसं भेदाः? उच्यते--चउव्विहो वंजणावग्गहो, छव्विहो अत्थावग्गहो, छव्विहा ईहा, छव्विहो अवायो, छव्विधा धारणा, एते सव्वे अट्ठावीसं। एयस्स अट्ठावीसइविहस्स मज्झातो जो वंजणावग्गहो चउव्विहो तस्स दुगादिट्ठंतेण परूवणा, 'से जहा णामए' इत्यादि, 'से' त्ति पडिबोधकस्स णिद्देसे, 'जहा णामए' त्ति जहा णाम संभवत आत्माभिप्रायकृतादित्यर्थः, सव्वण्णुप्पणीयमत्थं तदणुसारि सुत्तं वा अप्पबुद्धिविण्णाणत्तणयो अणवगच्छमाणो सीसो पुच्छाचोदणातो चोदको, अहवा तमेव सुतमत्थं वा अघडमाणं ति मण्णमाणो तदा स चोदयतो चोदगो भण्णति, पवयणमविरुद्धं निद्दोसं सुतत्थं पण्णवेंतो पण्णवगो विरुद्धपुणरुत्तसुत्तं वा अत्थतो अविरुद्धं दरिसेंतो पण्णवेति जो सो वा पण्णवगो भण्णति. यथावत्संशयच्छेदीत्यर्थः, चोदको संसयमावन्नो पण्णवगं पुच्छाति--'किं एगसमयादिपविट्ठा' इत्यादि कंठं, एवं चोदकं पुच्छाभिप्पायेण वदंतं पण्णवगोआह-'णोएगसमयपविट्ठा' इत्यादि, जो एस पडिसेहो कतो एस सद्दाइफुडविण्णाणजणगत्तेणं ति णो गहणमागच्छंति इहरा पोग्गला ॥ ६२ ॥

गहणमागच्छन्त्येवेत्यर्थः, एव एगादिसमयपविट्ठपोग्गलपडिसिद्धेसु इमा अणुण्णा असखेज्जसमयपविट्ठा पोग्गला गहणमाग च्छति त्ति, इमस्स अणणुयोगत्थो अणुयोगत्थो य, तत्थ अणणुयोगो इमो-जहा पवासी सगिहमेंतो अद्धाण पचाहेण दसाहेण वा वीतीवतित्ता सगिह पविट्ठो त्ति, एव असखेज्जेहिं समयेहिं आगता पविट्ठा कण्णविलेसु पोग्गला गेण्हति त्ति, एव अणणुयोगो भवति, इमो अणुयोगत्थो पढमसमयादारब्भ पतिसमय पविसमाणेसु असखेज्जइमे समए जे पविट्ठा ते गहण मागच्छति, ते य सद्दादिविण्णाणजणग त्ति काउ अतो तेसिं गहणमुवादिट्ठ, सो य असखेज्जइमो समयो किं पमाणे असखेज्जए भण्णति ? उच्यते-जहण्णेण आवलियाए असखेज्जभागमेत्तेसु समयेसु गतेसु त्ति, उक्कोसेण सखेज्जासु आवलियासु आणा-पाणुकालपुहत्ते वा उभयधाऽवि अविरुद्ध, गतो पडिबोधकदिट्ठतो, इदाणिं आवागसीसगदिट्ठतो-तत्थ आवागसीसग ति पागट्ठाणमेव, अहवा आपागट्ठाणस्स आसण्ण समता परिपेरत, अहवा आपागस्सुत्तारियाण ज ठाण त आपागसीसय भण्णति, अणतेहिं ति प्रथमसमयादारभ्य प्रतिसमय अणता प्रविशन्तीत्यतोऽनन्ता, जाहे त वजण पूरित भवति त्ति, एत्थ वजण ग्गहणेण सद्दाइपुग्गलदव्वा दव्विंदिय वा उभयसबधो वा घेतव्व तिधाऽवि ण विरोधो, वजण पूरिय ति कह ? उच्यते-जदा पुग्गलदव्वा वजण तदा पूरियति पभूता ते पोग्गलदव्वा जाता स्व प्रमाणमागता सविसयपडिबोधसमत्था जाता इत्यर्थ । जदा पुण दव्विंदिय वजण तदा पूरिय ति कह ? उच्यते-जाहे तेहिं पोग्गलेहिं त दव्विंदिय आवूत्त भरित वा वि त तदा पूरिय ति भण्णति, जदा तु उभयसबधो वजण तदा पूरिय ति कह ? उच्यते दव्विंदियस्स पुग्गला अगीभावमागता पुग्गला य दव्विंदिए अनुपक्ता. एस उभयभावो, एतम्मि उभयभावे पुग्गलेहि इदिय पूरित, पूरित इदिएण विसयपडिबोधरूप्पमाणा

पुग्गला गाहिता, एवं उभयसामत्थतो विण्णाणभावो भवतीत्यर्थः, हुंति करेइ त्ति वंजणे पूरिते तं अत्थं गेण्हइ त्ति वुत्तं भवति, एस एकसमयिओ अत्थावग्गहो, तं पुण किं पगारं गेण्हाति ? उच्यते--नो चेव णं जाणाति केव एस सद्दादी, तक्काले सामण्णमणिद्देसं सद्दादिविसेसं ण जाणइ त्ति वुत्तं भवति, किंच सरूवणामजातिगुणकिरियाविकप्पविमुहं तं अनाख्येयं गृह्णाती-त्यर्थः। एत्थ पडिबोधकालातो पुव्वं वंजणोग्गहो से भवति, एसा वंजणोग्गहस्स परूवणा कता। वंजणोग्गहस्स परतो हुंति करेति त्ति एतम्मि पडिबोधकाले एगसमइयो अत्थावग्गहो से भवति, ततो से कमेण इहोवायधारणाउ त्ति। एत्थ पडिबोहगमल्लगादिट्ठंतेहिं वंजणोग्गहस्स अत्थोग्गहस्स य भिण्णकालता फुडं दांसिता। पर आह--साधु भे पडिबोधमल्लगादिट्ठं-तेहिं वंजणत्थावग्गहाण भेदो दंसितो, जागरओ पुण सद्दाइ अत्थे पडुप्पण्णे ण वंजणोग्गहो लक्खिज्जति, जतो पुव्वामेव सद्दाइअत्थविण्णाणमुप्पज्जते, भाणितं च सुत्ते--'से जहा णामए केइ पुरिसे' इत्यादि, अहवा इमस्स सुत्तस्स इमो संबंधो--पर आह--यदुक्तं भवता सरूवणामजातिगुणक्रियाविकल्पविमुखं अनाख्येयं गृह्णातीत्येतद्विरुध्यते, कुतः ? यतः सूत्रेऽभिहितं से जहा णामए इत्यादि, अहवा इमो संबंधो--सुप्तप्रतिबोधकमल्लगदिट्ठंतेहिं वंजणत्थावग्गहाण भेदो दंसितो, इह पुण सुत्ते मल्लगदिट्ठंतेणेव वंजणत्थावग्गहाण भेदो दांसिज्जाति 'से जहा णामए' इत्यादि, सुत्तुच्चारणसवणाणंतरमेव पर आह--एत्थ सुत्ते वंजणत्थावग्गहेहा ण लक्खिज्जंति, जतो अव्वत्तं सद्दं सुणेइ त्ति भाणितं, सद्दमेतेऽवधारिते पढमतो अवाय एव लक्खिज्जति त्ति, आयरिय आह--ण तुमं सुत्ताभिप्पायं जाणासि, णणु अव्वत्तसद्दसवणातो अत्थावग्गहग्गहणं कतं, जतो अव्वत्तमणिद्देसं सामण्णं विकप्परहियं ति भण्णति, तस्स य पुव्वं वंजणावग्गहेण भवितव्वं, जतो पत्तग्गाहिणो सोतादिइंदियस्स अत्थोग्गहो

प्रतिबोधक-मल्लक-दृष्टान्तौ

वजणोग्गहमवरेण ण भवति । त्ति नियमेण सो, सो य कालसुहुमत्तणतो उप्पलसतपत्तच्छेज्जादिट्ठततो लक्खिज्जति । चोदक आह जति एव तो ज सुत्ते भणित ते ण सद्दे ति ओग्गहिते, त कह ? उच्यते इह च तेण सद्देण ति उग्गहितो त्ति वक्ता सूत्रकारोऽभिधत्ते इति करणनिद्देसातो सव्वविसेसविमुह श दमात्रमुक्त भवति, णो चेव ण जाणति के वेस सद्दे त्ति, ण तु शब्दोऽयमित्येव वुच्यते, कम्हा ? उच्यते-एकसमयत्तातो अत्थावग्गहस्स किं च पण्णवेंतो य पण्णवगो सववहाराभिप्पायतो तेण सद्दे ति ओग्गहिते त्ति वुत्ते ण दोसो, जति वा सद्दोऽयमिति बुद्धी भवे तो अवातो चेव भवे, तच्च न, कह ? उच्यते-णो जतो अत्थावग्गहसमयमेत्ते काले सद्दइ ति विसेसणाणमत्थि, अह तम्मि वि समए सद्दोऽयमिति बुद्धी हवेज्ज तो फुड अवाय एव भवेज्ज, णो य तक्काले अवातो इच्छिज्जति, जतो अत्थपरिच्छेदो असखेज्जसमयकालिओ भवइ त्ति । अण्णे पुण आयरिआ एत सुत्त विसेसत्थावग्गहे भणति अव्वत्त सद्द सुणेज्जात्ति एस विसेसत्थावग्गहो तेण सद्दे त्ति उग्गहिते त्ति, एत सुत्तखड सामण्णस्सत्थावग्गहस्स दसग, कह ? उच्यते-जतो भण्णति णो चेव ण जाणति केव एस सद्द त्ति, सखसगणादिकरयलादिको त्ति, एसोऽवि अविरुद्धो सुतत्थो, ततो अत्थावग्गहसमयाणतर पढमसमयादिसु ईह अणुपविसाति ईह त्ति केइ ससय मण्णते, त ण भवति, ससयस्स अण्णाणभावत्तणतो, मतिणाणसो य ईह त्ति । आह-को पुण ससयेहाण विसेसो ? उच्यते-इह ज थाणुपुरिसादिअत्थेसु पेहित चित्त तदत्थपडिनोहणेण पडिहत, सुत्त इव चेतो ससयो भण्णति, त च अण्णाण, ज पुण हेतूववत्तिसाघणेहिं सब्भूतमत्थस्स विसेसधम्माभिमुहालोयण तस्सेवत्थस्स अधम्माविमुह असमोहमाविफलमत्थपरिच्छेदक चित्त ज त ईहा भण्णति । अणु त्ति अवग्गहातो पच्छाभावे असखेज्जसमइय परिमाणतो ईहोवयोग अविच्छेयत्तणतो अत

मुहुत्तकालं ईह त्ति, ततो विसिट्ठमतिनाणखयोवसमभावत्तणतो अंतमुहुत्तकालब्भंतर एव जाणति अमुए एस सद्दो संख-संगादिए त्ति दुबबोधत्तणतो पुण अत्थस्स अविसिट्ठमइण्णाणखयोवसमयत्तणतो वा ईहोवयोगे अंतोमुहुत्ते वुत्ते अणवगतत्थो पुणोऽवि अण्णं अंतमुहुत्तं ईहते । एवं ईहोवयोगविच्छेदसंताणतो बहुएऽवि अंतमुहुत्ते ईहेज्जा ण दोसो । ततो ईहाणंतरं अवातो, सो य सद्दाइअत्थपडुप्पण्णस्स जे परधम्मा तेसु निमुहस्स सधम्मे य अवधारयतो ण एस संगसद्दो णिद्धमधुरगंभीर-त्तणतो संखसद्दोऽयमिति, एवमवगतत्थो असंखेज्जसमयितो उक्कोसतो णियमा एगंतमुहुत्तिओ जो अवबोधो यो एस अत्थ-परिच्छेदो सो अवातो भवति । ततो अवायाणंतरं धारणं पविसइ त्ति, सा य धारणा जहण्णतो असंखेज्जसमते अविच्चुतीए-तमत्थं धरेति, उक्कोसतो अंतमुहुत्तं अणुवयोगतो पुण तमत्थं निस्मृतं पुणोऽवि संभरइ त्ति धारणा, एवं सा संखेज्जवासा-उयाणं मुहुत्तदिवसादिकालसंखाए संखेज्जं कालं भवेज्ज, असंखेज्जवासाउयाणं पुण असंखेज्जकालं हवेज्जा एवं चक्खिंदिएऽ-वि रूवं भाणितव्वं वंजणोग्गहवज्जं, घाणरसफासिंदिएसु वि जहा सोइंदिते तहा सव्वं भाणितव्वं संवेदेज्जाति, एते सद्दादि-इंदियत्थे पडुप्पण्णे इंदियं स्वं स्वं इंदियत्थं आवरणखोवसममणुरूवं सुभमसुभं वा वेदेज्ज त्ति, एते सद्दाई चक्खुइंदियवज्जं सेसेंदिएहि पत्तासिंदियत्थं पायसो इट्ठमणिट्ठं वा स्वमात्मानुगतं वेदनं वेदेत्ते न सरीरेण अनुपलंभं वा वेदयतीत्यर्थः, फासिं-दियमत्थं पुण स्वमनुगतं सरीरानुगतं च दुहाऽवि फुडं वेदइ त्ति संवेदेज्जाति, अतो भाणितं, एवं मणसो सुविणंमि सद्दादि-विसएसु अवग्रहादयो णेया । अण्णत्थ वा इंदियवावारअभावे मणो माणसीए त्ति इह सुत्ते णं निदरिसणं भणे, 'से जहा णामए' इत्यादि सुत्तं कंठं । सुविणो मे दिट्ठो त्ति सुविणदट्ठं अव्वत्तं सुमरइ, तत्र प्रतिबोधप्रथमसमये सुविणमिति संभरतो अत्थावग्गहो

तस्य पूर्वमवस्थायां व्यञ्जनावग्रह परत ईहादि, शेष पूर्ववत् । जगतो अणिंदियत्थवावारेऽवि मणसो जुज्जते वजणावग्गहो, उवयोगस्स असखेज्जसमयत्तणयो उवयोगद्धाए य प्रतिसमयमणोदव्वग्गहणतो मणोदव्वाण च वजणववदेसतो समए य असखेज्जतिमे मनसो नियमार्थग्रहण भवेत्तस्य च प्रथमसमयार्थप्रतिबोधकालेऽर्थावग्रह तस्य पूर्वमसङ्ख्येयसमयेषु व्यञ्जनावग्रह, शेषमीहादि पूर्ववत् । सीसो पुच्छति-उग्गहादीण उ कमातिक्कमे एकतरअभावे वा किं सद्दादिवत्थुपरिच्छेदो ण भवति ? आचार्य आह-आम ण भवति, अत एव च क्रमे नियम', जम्हा णो अगहित ईहति, तम्हा, पुव्व उग्गहो, जम्हा य अणीहित णो अवगच्छति, ईहाणतर तम्हा अवायो, जम्हा य अणावाय ण धारिज्जति वत्थु, अवायाणतर तम्हा धारणा, जम्हा य एप क्रमनियमो तम्हा सव्वो आभिनिवोधियनाणावगमो नियमा एव भवति, अत एव च कारणा सव्वे अवग्रहादयो मतिनाणभेदा भवन्तीत्यर्थ ॥

वृत्ति —'उग्गहे'त्यादि, अर्थावग्रह एकसामयिक, आन्तमौहूर्त्तिकी ईहा, आन्तर्मौहूर्त्तिकोऽपाय, धारणा सङ्ख्येय वाऽसङ्ख्येय वा काल स्मृतिवासनारूपा, सङ्ख्येयवर्षायुषा सङ्ख्येयमसङ्ख्येयवर्षायुषामसङ्ख्येयम्। 'एव अट्ठावीसाविधस्स' इत्यादि, एवम्-उक्तेन प्रकारेण अष्टाविंशतिविधस्य, कथमष्टाविंशतिविधम् ? चतुर्विधो व्यञ्जनावग्रह, षड्विधोऽर्थावग्रह, षड्विधा ईहा, षड्विधोऽपाय ,षड्विधा धारणा, एवमष्टाविंशतिविधस्य आभिनिवोधिकज्ञानस्य सम्बन्धी यो व्यञ्जनावग्रहस्तस्य प्ररूपण-प्रतिपादन करिष्यामि । कथ ? प्रतिवोधकदृष्टान्तेन मल्लकदृष्टान्तेन च 'से किं त' इत्यादि, प्रतिबोधयतीति प्रतिबोधक, स एव दृष्टान्तस्तेन, तद्यथा नाम कश्चिदानिर्दिष्टस्वरूप॰ पुरुष कञ्चिदन्यतममनिर्दिष्टस्वरूपमेव पुरुष सुप्त सन्त

' पडिबोधएज्ज ' त्ति प्रतिबोधयेत्, कथं ? अमुक ! अमुक ! इति, तत्र ' चोयगे ' इत्यादि, इह ज्ञानावरणकर्मोदयतः कथितमपि सूत्रार्थमनवगच्छन् प्रश्नचोदनाच्चोदकः, अविशिष्टक्षयोपशमभावतो वाऽगृहीतशास्त्रगर्भार्थपूर्वापरविरोधचोदनाच्चोदकः । यथावस्थितं सूत्रार्थं प्रज्ञापयतीति प्रज्ञापकः श्रोतार्थापेक्षया निरुद्धं पुनरुक्तसूत्रं वाऽर्थतोऽविरुद्धं अपुनरुक्तं प्रज्ञापयतीति प्रज्ञापकः । तत्र चोदकः प्रज्ञापकमेवमुक्तवानिति, भूतकालनिर्देशोऽनादिमानागम इति ख्यापनार्थः । किमेकसमयप्रविष्टेत्यादि सुगमं यावत् एवं वदन्तं चोदकं प्रज्ञापक एवमुक्तवान्—नो एकसमयप्रविष्टेत्यादि प्रकटार्थं यावत् नो संख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति, नवरमयं प्रतिषेधः स्फुटशब्दविज्ञानग्राह्यतामधिकृत्य वेदितव्यः शब्दविज्ञानजनकत्वेनेत्यर्थः, अन्यथा संबंधमात्रमधिकृत्य प्रथमसमयादारभ्य ग्रहणमागच्छन्त्येव । ' असंखेज्ज ' इत्यादि, प्रतिसमयप्रवेशनादित आरभ्यासंख्येयसमयैः प्रविष्टैः असंख्येयसमयप्रविष्टाः, न पुनर्विंशत्याऽहोभिः पथिकगृहप्रवेशवदपान्तरालागमनसमयापेक्षयाऽसंख्येयसमयप्रविष्टा इति । पुद्गलाः शब्दद्रव्यविशेषा ग्रहणमागच्छन्ति, अर्थावग्रहज्ञानहेतवो भवन्तीति भावः । इह च चरमसमयप्रविष्टा एव ग्रहणमागच्छन्ति तदन्ये त्विन्द्रियक्षयोपशमोपकारिण इत्योघतो ग्रहणमुक्तमिति, असंख्येयमानं चात्र जघन्यमावलिकाऽसंख्येयभागसमयतुल्यम्, उत्कृष्टं तु संख्येयावलिकासमयतुल्यं, तच्च प्राणापानपृथक्त्वकालसमयमिति उक्तं च -" वंजणवग्गहकालो, आवलियाअसंखभागमेत्तो उ । थोवो उक्कोसो पुण, आणापाणूपुहुत्तं ति ॥१॥" ' से त ' इत्यादि निगमनं, सेयं प्रतिबोधकदृष्टान्तेन व्यञ्जनावग्रहप्ररूपणेति वाक्यशेषः । ' से किं तं ' इत्यादि, अथ कोऽयं मल्लकदृष्टान्तः ? मल्लकदृष्टान्तो नाम तद्यथा नाम कश्चित् पुरुषः ' आपाकशिरसः ' आपाकः-प्रतीतः तच्छिरसश्च मल्लकं-

शराव गृहीत्वा, इद रूक्ष भवतीत्यतोऽस्य ग्रहणमिति, तत्र मल्लके एकमुदकबिंदु प्रक्षिपेत् स नष्ट तत्रैव तद्भावपरिणतिमापन्न इत्यर्थ', शेष सुगम यावत् ' जे ण त मल्लग रावेहिइ त्ति ' आर्द्रता नेष्यति, शेष सुगम यावत् ' एवामेव ' इत्यादि, अतिबहुत्वात्प्रतिसमयमनन्तै पुद्गलै शब्दपुद्गलै' यदा तद्व्यञ्जन पूरित भवति तदा ' हुमिति करोति ' तमर्थं गृह्णाति इत्युक्त भवति, अत्र व्यञ्जनशब्देन त्रयमभिगृह्यते द्रव्यमिन्द्रिय सबधो वा, यदा द्रव्य व्यञ्जनमधिक्रियते तदा पूरितमिति प्रभूतीकृत स्वप्रमाणमानीत स्वविषयव्यक्तौ समर्थीकृतमित्यर्थ', यदा व्यञ्जनमिन्द्रिय तदा पूरितमिति आभृत व्याप्तमित्यर्थः, यदा द्वयोरपि सबधोऽधिक्रियते तदा पूरितमिति अङ्गाङ्गीभावमानीतमनुषक्तमित्यर्थ', एव यदा पूरित भवति तदानीं तमर्थं गृह्णाति, किंविशिष्ट ? नामजात्यादिकल्पनारहित, तथा चाह " णो चेव ण जाणाइ के वेस सद्दादि त्ति " न पुनरेव जानाति क एप शब्दादिरर्थ इत्येकसामयिकत्वादर्थावग्रहस्य, अत्राथावग्रहात् पूर्वं सर्वो व्यञ्जनावग्रह इति ' तत्तो ईह पविसइ ' इत्यादि सुगम यावत् ' सखेज्ज वा असखेज्ज वा काल ति ' । आह--सुप्तमङ्गीकृत्य युज्यतेऽय न्याय, जाग्रतस्तु शब्दश्रवणसमनन्तरमेवावग्रहेहाव्यतिरेकेणैवापायज्ञानमुत्पद्यते, तथोपलम्भात्, न चैतदनाप, यत आह--सूत्रकार -- ' से जहा नामए ' इत्यादि, अथवा यदुक्त न पुनरेव जानाति क एप शब्दादि' किं तर्हि नामजात्यादिकल्पनारहित गृह्णातीत्येतदयुक्त, यत एवमागम --' से ' इत्यादि, अथवा सुप्तप्रतिबोधकमल्लकदृष्टान्ताभ्या व्यजनार्थावग्रहयो· सामान्येन स्वरूपमभिधाय अधुना मल्लकदृष्टान्तेनैव प्रतिपादयन्नाह--' से जहा ' इत्यादि, तद्यथा नाम कश्चित् पुरुषोऽव्यक्त शब्द शृणुयात्, अव्यक्तमिति अनिर्देश्यस्वरूप नामादिकल्पनारहितमित्यनेनार्थावग्रहमाह, तस्य च श्रोत्रेन्द्रियसबन्धिनो व्यञ्ज-

श्रीनन्दी सूत्रं सचूर्णि वृत्तिकम्

॥ ६६ ॥

नावग्रहपूर्वकत्वात् व्यञ्जनावग्रहं च । आह--न ह्यत्रैवं क्रम उपलभ्यते, किं त्वक्षेपेण शब्दापायज्ञानमेव वेद्यते, सूत्रे व्यक्तमिति शब्दविशेषणं कृतम्, अतोऽव्यक्तं सांदिग्धं पुरुषादिशब्दभेदेन शब्दं शृणुयादिति न्याय्यं, तथा चोत्तरसूत्रमप्येतदेवाह-- ' तेणं सद्दे त्ति उग्गहिते ' तेन श्रोत्रा शब्द इत्यवगृहीतं, ' णो चेव णं जाणाति को वेस सद्दादि ' न पुनरेवं जानाति क एष पुरुषादिसमुत्थानामन्यतमः शब्द इति, आदिशब्दाद्रसादिष्वपि अययेव न्याय इति ज्ञापयति ' ततो ईहं पविसति ' इत्याद्यपि संबद्धमिति, नैतदेवमुत्पलपत्रशतव्यतिभेददृष्टान्तेन कालभेदस्य दुर्लक्षत्वादक्षेपेण शब्दापायज्ञानानुपपत्तेः, यच्च तेन शब्द इत्यवगृहीतमित्युक्तम्, अत्र शब्द इति भणाति वक्ता सूत्रकार इति करणनिर्देशाच्छब्दमात्रं वा शेषविशेषविमुखं न तु शब्दबुद्ध्या, तस्यैवापायप्रसंगात्, अवग्रहादिश्रुतव्यतिरेकेण च मतिज्ञानानुत्पत्तेः, तथा चाह--'णो चेव णं ' इत्यादि, न पुनरेवं जानाति क एष शब्दादिरर्थः सामान्यमात्रप्रतिभासनात्, आह च भाष्यकारः--" अव्वत्तमणिद्देसं, सरूवणामादिकप्पणारहितं । जदि एवं जं तेणं, गहियं सद्दोत्ति तं कह णु ॥ १ ॥ सद्दे त्ति भणति वत्ता तम्मत्तं वा ण सद्दबुद्धीए । जादि होज्ज सद्दबुद्धी, तोऽवाओ चेव सो होज्जा ॥२॥ जदि सद्दबुद्धिमेत्तय--मवग्गहे तव्विसेसणमवाओ । णणु सद्दो णासद्दो, ण य रूवादी विसेसोऽयं ॥३॥ थोवम्मि य णावायो, तब्भेयाविक्खणं अवाओ त्ति । तब्भेयाविक्खाए, णणु थोवमिणं पि णावाओ ॥४॥ " इत्यादि । अन्ये त्वाचार्या इदं सूत्रं विशेषसामान्यार्थावग्रहविषयं व्याचक्षते--अव्यक्तम्--अनिर्धारितविशेषस्वरूपम्, अशब्दव्यवच्छेदेन शब्दं शृणुयात् तेन शब्द इति शब्दमात्रमवगृहीतं, न पुनरेवं जानाति क एष शब्दः शांखशार्ङ्गादीनामन्यतमः ? आदिशब्दाद्रसादिपरिग्रहः, तत्रापीयमेव वार्तेति युक्तियुक्ता चेयं व्याख्येति । तत ईहां प्रविशति सदर्थ-

